Digitized by Arya Samaj Foundation Chennai and eGangotri

RA
224.89
अमर-उत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

14180

228

RA224.SHA-A
14180

CHECKED 1973

देवयज्ञ विधावाचस्पति

अथ उत्सर्जनोपाकरणप्रयोगप्रारंभः ॥

(ऋग्वेदी श्रावणी)

COMPILED

पुस्तक की संख्या.....
पुस्तकालय—पञ्जिका—संख्या.....14180
पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है।
महाशय १५ दिन से अधिक देर तक पुस्तक अपने पास रख सकता। अधिक देर तक रखने के लिये आज्ञा प्राप्त करनी चाहिये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

maj Foundation Chennai and eGangotri

* ओ३म् *

14180

पुस्तक की संख्या २२४/८६

पुस्तकालय-पञ्जिका-संख्या.....

पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है। कोई महाशय १९ दिन से अधिक देर तक पुस्तक अपने पास नहीं रख सकता। अधिक देर तक रखने के लिये पुनः आज्ञा प्राप्त करनी चाहिये।

॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ उपाकर्मोत्सर्जनकारिकाः ॥

श्रीः ॥ अध्यायानामुपाकर्मश्रावण्यांश्रवणेनतु । तन्मासेहस्तयुक्तायांपचम्यांवातदिष्यते ॥ १ ॥ अवृष्ट्यौषधयस्तस्मिन्मासेतु नभवन्तिचेत् । तदाभाद्रपदेमासिश्रवणेनकरोतितत् ॥ २ ॥ कर्मद्वयमिदंकेचिल्लौकिकाग्नौप्रकुर्वते । आज्यसंस्कारपर्यन्तमुपलेपादिपूर्ववत् ॥ ३ ॥ आज्येनदधिसक्तूनांपर्यग्निकरणंभवेत् । उत्पूतमात्रमाज्यंचेत्तेषांत्रिःप्रोक्षणंभवेत् ॥४॥ इध्माभिघारणांतंस्यादाज्याद्युद्वासनादिकम् । अन्वारब्धोऽधुनाशिष्यैःस्वयमेवनसंतिचेत् ॥ ५ ॥ प्रकुर्वीताज्यभागांतमिध्माधानादिपूर्ववत् । इहाज्यभागौनित्यौस्तस्तथैवोत्सर्जनेऽपितौ ॥ ६ ॥ हुत्वाज्यंनवभिर्मंत्रैःसावित्र्याद्यैरतःपरम् । अथावदानधर्मेणतान्सक्तून्दधिसंयुतान् ॥ ७ ॥ हुत्वाग्निमीळइत्याद्यैर्मंत्रैर्विंशतिभिःक्रमात् । शाकलानांसमानीवइत्यृचांत्याहुतिर्भवेत् ॥ ८ ॥ वाष्कलानांतुतच्छंयोरित्यृचांत्याहुतिर्भवेत् । अथस्विष्टकृतंहुत्वादधिसक्तुभिरेवच ॥ ९ ॥ दधिसक्तून्स्वयंशिष्याः प्राश्याचम्यततःपरं ॥ परिस्तरणदर्भैस्तैरंतर्दधतितेंऽजलीन् ॥ १० ॥ अन्येनसेचयित्वापस्ताभिःकुर्वंतिमार्जनम् ॥ पश्चादग्नेस्तुदर्भेषुप्रागग्रेषूपविश्यच ॥ ११ ॥ आसिच्यापःशरावादौदर्भांस्तत्रनिधायच । प्रागग्रदर्भगर्भांस्तेकुर्युर्ब्रह्मांजलीनथ ॥ १२ ॥ सव्याहृतिंजपंत्युच्चैःसावित्रींब्रह्मयज्ञवत् । त्रिरभ्यसेयुरोंकारंव्याहृतीश्चात्रकर्मणि ॥ १३ ॥ अग्निमीळइदंसूक्तमनुवाकमथापिवा । प्रारभेरंस्तृचंचापिअध्याप्यान्वाचयेद्गुरुः ॥१४॥ प्रायश्चित्तादिसकलंहोमशेषंसमापयेत् । अनध्यायान्स्मृतौसिद्धान्परिहृत्यत्वधीयते ॥ १५ ॥ यस्त्वपूर्वमधीतेऽसौप्रारभेतशुभेऽहनि । समावृत्तोऽप्यधीयानोमधुमांसादिवर्जयेत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ १६ ॥ ऋतुस्नातोपगमनंसमावृत्तस्यमन्वते । अतआरभ्यषण्मासान्नियमेनत्वधीयते ॥ १७ ॥ पश्चादंगानिषण्मासाञ्शिष्य मध्यापयेद्गुरुः ॥ १८ ॥ श्रीः ॥ अध्यायोत्सर्जनंमाघ्यांपौर्णमास्यांविधीयते । ग्रामाद्बहिर्विविक्तेस्यादुपलेपादिपूर्ववत् ॥१॥ गृहपक्वंसमीपेऽग्नेर्निधायाज्यमधिश्रयेत् । संस्कार्यसक्तुवच्चान्नंशांतिकर्मणिचात्रतु ॥ २ ॥ तत्राज्याहुतिपर्यंतमुपाकरणव द्भवेत् । जुहोतिगृहसिद्धान्नमुपाकरणवत्ततः ॥ ३ ॥ अन्नेनस्विष्टकृद्धोमोनस्तःप्राशनमार्जने । वेदाद्यारंभणंकृत्वाकर्मशिष्टं समापयेत् ॥ ४ ॥ अथतीरमपांगत्वातेऽवगाह्यततोजलम् । ऋषीन्दर्भमयान्कृत्वापूजयेत्तर्पयेत्ततः ॥ ५ ॥ सावित्र्याद्यानवा ग्न्याद्यादेवतास्तर्पयंत्यथ । सावित्रींतर्पयाम्यग्निंतर्पयामीतितर्पयेत् ॥ ६ ॥ जयंतस्त्वग्निमीळादिमंत्रैस्तर्पणमब्रवीत् । ब्रह्म यज्ञांगमुक्तंयत्तर्पणंस्यादिहापितत् ॥७॥ अतआरभ्यषण्मासान्षडंगानित्वधीतये। शुक्लेवेदांस्त्वधीयीरन्कृष्णेंऽगानीतिकेचन । कर्मद्वयमिदंकेचिल्लौकिकाग्नौप्रयुंजते ॥ ८ ॥ इत्युपाकर्मोत्सर्जनीयाभट्टकुमारिलगृह्यकारिकाः ॥ ॥छ॥ ॥छ॥ अथोपाकर्मकालः ॥ तत्रबह्वृचानांश्रावणशुक्लपक्षेश्रवणनक्षत्रंपंचमीहस्तइतिकालत्रयं तत्रश्रवणंमुख्यकालस्तदलाभेपंचम्या दिः। तथाचकालतत्त्वविवेचनेसंग्रहकारिकायां। पर्वणिश्रवणेकार्यंग्रहसंक्रांत्यदूषिते। अध्वर्युभिर्बह्वृचैश्चकथंचित्तदसंभवे। तत्रै वहस्तपंचम्यांतयोःकेवलयोरपि । तत्रदिनद्वयेश्रवणसत्त्वेयदिपूर्वसूर्योदयमारभ्यप्रवृत्तंश्रवणंद्वितीयदिनेसूर्योदयोत्तरं त्रिमु हूर्तवर्ततेतदापरदिनएवोपाकर्म धनिष्ठायोगप्राशस्त्यात् यदित्रिमुहूर्तन्यूनंतदापूर्वदिनएव संपूर्णव्याप्तेः यदिपूर्वदिनेसूर्योदये नास्तिपरदिनेसूर्योदयोत्तरंमुहूर्तद्वयंवर्ततेतदोत्तरदिनेएव उत्तराषाढावेधनिषेधादित्यादि । विशेषआकरेषुज्ञेयः ॥ ॥छ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अथपंचगव्यमेलनम् ॥

श्रीः ॥ आचम्यप्राणानायम्य देशकालाद्युच्चार्य श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंउत्सर्जनांगत्वेनपंचगव्यमेलनंकरिष्ये ॥ गाय त्र्यागोमूत्रं ॥ ॐ भूर्भुवःस्वः ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ गंधद्वारेतिगोमयं ॥ ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥आप्यायस्वेतिपयः ॥ ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं ॥ भवावाजस्यसंगथे ॥ दधिक्राव्णइतिदधि ॥ ॐ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् ॥ शुक्रमसीतिघृतं ॥ ॐ शुक्रमसिज्योतिरसितेजोसि ॥ ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ इतिकुशोदकं ॥ ॐ इतिप्रणवेनालोडनंमंथनंदिक्षुविक्षेपश्च ॥ आपोहिष्ठेतितृचेनापिमज्जीयात् ॥ इतिपंचगव्यविधिः ॥

॥ अथउत्सर्जनप्रयोगः ॥

श्रीगणेशायनमः ॥ आचम्यपवित्रंधृत्वाप्राणानायम्यदेशकालौसंकीर्त्यश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ममाध्याप्यानांचाधी

१ उत्सर्जनोपाकरणसंभाराश्च–रंगवल्लीपिष्टं(रांगोळी)दर्भदूर्वामृत्समिद्गोमूत्रगोमयगोपयोदधिघृतंभस्मतिलयवतंदुलतांबूलपूगफलनारिकेलफलकदलीफलकर्कटीवस्त्रयज्ञोपवीतगंधपुष्पाक्षतधूपदीपगुडशर्कराचरुदधिसक्त्विधनवेणुधमनीपलाशपर्णाम्रपर्णस्रुक्स्रुवपर्णपुटासनाचमनपात्रताम्रकलशजलसेचनभाजनानिसंपाद्य । (ब्रह्मचारिणस्तु—वस्त्रमेखलाजिनकौपीनदंडाःपुण्याहवाचनंच इतिविशेषः) ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तानांछंदआदीनायातयामतानिरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थं एभिर्ब्राह्मणैःसह अद्य (औपाकरणेह्नि) अंतरितमु त्सर्जनाख्यंकर्मकरिष्ये । तत्रादौशरीरवाङ्मनःशुद्ध्यर्थंपंचगव्यप्राशनंनिर्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनंचकरिष्ये ॥ प्रथमं सर्वेपंचगव्यंप्राश्नीयुः ॥ तत्रमंत्रः॥ॐ यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामके। प्राशनंपंचगव्यस्यदहत्वग्निरिवेंधनं॥ ॐ इतिप्राश्य आचामेत् एवंत्रिः। गणपतिंपूजयित्वा ॥ अद्येत्यादिउत्सर्जनहोमंकर्तुंस्थंडिलादिसकलंकर्मकरिष्ये ॥ तद्गोमयेनप्रदक्षिणमुपलि प्यदक्षिणेऽष्टौउदीच्यांद्वेप्रतीच्यांचतुःप्राच्यामर्धमित्यंगुलानित्यक्त्वा दक्षिणोपक्रमामुदक्संस्थांप्रादेशमात्रामेकांलेखांतस्याद क्षिणोत्तरयोःप्रागायतेप्रादेशसंमितेद्वेलेखेलिखित्वा तयोर्मध्येपरस्परमसंसृष्टाःप्रागायताःप्रादेशसंमितास्तिस्रइतिषड्लेखायज्ञि यशकलमूलेनदक्षिणहस्तेनोल्लिख्य लेखासुतच्छकलमुदगग्रंनिधायस्थंडिलमद्भिरभ्युक्ष्यशकलमाग्नेय्यांनिरस्यपाणिंप्रक्षाल्यवा ग्यतोभवेत् ॥ अग्निमाहृत्य॥ जुष्टोदमूनाआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप् एह्यग्नेराहूगणोगोतमोग्निस्त्रिष्टुप् अग्न्यावाहनेविनियोगः ॥ ॐ जुष्टोदमूनाअतिथिर्दुरोणइमंनोयज्ञमुपयाहिविद्वान्। विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभराभोजनानि ॥ एह्यग्नइह होतानिषीदादब्धःसुपुरएताभवानः। अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान्॥ इत्यक्षतैरावाह्यआच्छादनंदूरी कृत्य समस्तव्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृहती अग्निप्रतिष्ठापनेविनियोगः ॥ ॐ भूर्भुवःस्वःबलवर्धननामानमग्निंप्रति ष्ठापयामि॥प्रोक्षितेंधनादिनिक्षिप्य वेणुधमन्याप्रबोध्यध्यायेत्॥चत्वारिश्रृंगेत्यस्यगोतमोवामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्यानेवि नियोगः॥ॐ चत्वारिश्रृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याआविवेश॥सप्तहस्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रतुःश्रृंगःसप्तजिह्वोद्विशीर्षकः । त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः ॥ स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधातथा । विभ्रद्द
क्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं॥तोमरंव्यजनंवामैर्घृतपात्रंचधारयन् । मेषारूढोजटावद्धोगौरवर्णोमहौजसः ॥ धूम्रध्वजोलो
हिताक्षःसप्तार्चिःसर्वकामदः । आत्माभिमुखमासीनएवंरूपोहुताशनः ॥ अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखममसंमुखो
वरदोभव ॥समिद्वयमादाय क्रियमाणे उत्सर्जनहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये ॥ अस्मिन्नन्वाहितेग्नौजातवेदसमग्निमि
ध्मेनप्रजापतिंप्रजापतिंचाघारदेवतेआज्येनाग्नीषोमौचक्षुषीआज्येन ॥ अत्रप्रधानं–सावित्रीं ब्रह्माणं श्रद्धां मेधां प्रज्ञां धारणां
सदसस्पतिं अनुमतिं छंदांस्यृषीन् एताःप्रधानदेवता आज्यद्रव्येण॥पुनरत्रप्रधानं--अग्निं अमृणसूर्यान् अग्निं शकुंतं अग्निं मित्रा
वरुणौ अग्निं अपः अग्निं मरुतः अग्निं विश्वान्देवान् अग्निं इंद्रासोमौ इंद्रं अग्नामरुतः पवमानसोमं पवमानसोमं अग्निं संज्ञानं
एताःप्रधानदेवताः गृहसिद्धचरुद्रव्येण ॥शेषेणस्विष्टकृतमग्निमिध्मसंनहनेनरुद्रमयासमग्निंदेवान्विष्णुमग्निंवायुंसूर्यंप्रजापतिं
चैताःप्रायश्चित्तदेवताआज्येनज्ञाताज्ञातदोषनिबर्हणार्थंत्रिवारमग्निंमरुतश्चाज्येनविश्वान्देवान्संस्रावेण अंगदेवताःप्रधानदेव
ताःसर्वाःसन्निहिताःसंतुसांगोपांगेनकर्मणासद्योयक्ष्ये ॥ समस्तव्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृहती अन्वाधानसमिद्धो
मेविनियोगः ॥ ॐ भूर्भुवःस्वःस्वाहा प्रजापतयइदंनमम ॥ इध्मावर्हिषोश्चसन्नहनं त्रिःपरिसमूहनं परिस्तरणं ॥ तत्रप्राच्यांप्रती
च्यांचोदगग्रादर्भाः अवाच्यामुदीच्यांचप्रागग्राःपूर्वपश्चात्परिस्तरणमूलयोरुपरिदक्षिणपरिस्तरणं उत्तरपरिस्तरणंतुतदग्रयोर
धस्तात्तेचदर्भाअनियतसंख्याएकैकस्यांदिशिचत्वारश्चत्वारइत्येवंषोडशवा ॥ ततोऽग्नेर्दक्षिणतोब्रह्मासनार्थं उत्तरतश्चपात्रासा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दनार्थकांश्चित्प्रागग्रान्दर्भानास्तृणीयात् ॥ (पर्युक्षणं३पवित्रकरणं पात्रासादनं)उत्तरास्तीर्णेषुदर्भेषुदक्षिणसव्यपाणिभ्यांक्रमेण चरुस्थालीप्रोक्षण्यौ दर्वीस्रुवौ प्रणीताऽऽज्यपात्रे इध्मावर्हिषीचेतिद्वेद्वेउदगपवर्गंप्राक्संस्थंन्युब्जान्यासादयेत्॥ततःप्रोक्षणीपात्रमुत्तानंकृत्वातत्रानंतर्गर्भितसाग्रसमस्थूलप्रादेशमात्रेकुशद्वयरूपेपवित्रेनिधाय शुद्धाभिरद्भिस्तत्पात्रंपूरयित्वागंधपुष्पाक्षता दिक्षिप्त्वा हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यांपाणिभ्यामुदगग्रेपृथक्पवित्रेधृत्वा अपस्त्रिरुत्पूय पात्राण्युत्तानानिकृत्वा इध्मंचविस्रस्य सर्वाणिपात्राणित्रिःप्रोक्षेत् ॥ ताअपःकिंचित्कमंडलौक्षिपेदित्येके प्रणीतापात्रमग्नेःप्रत्यङ्निधाय तत्रप्रागग्रेपवित्रेनिधाय उत्पूताभिरद्भिस्तत्पात्रंपूरयित्वागंधपुष्पाक्षतान्निक्षिप्यमुखसममुद्धृत्य ॐ प्रणय अग्नेरुत्तरतोदर्भेषुनिधाय तेपवित्रे गृहीत्वाअन्यैर्दर्भैराच्छादयेत् ॥ तेपवित्रेआज्यपात्रेनिधाय तत्पात्रंपुरतःसंस्थाप्य तस्मिन्नाज्यमासिच्य अग्नेरुत्तरतःस्थितांगारान्भस्मनासहाग्नेरुदक्परिस्तरणाद्बर्हिर्निरुह्य तेष्वाज्यपात्रमधिश्रित्य ज्वलतादर्भोल्मुकेनावज्वल्य अंगुष्ठपर्वमात्रंप्रक्षालितंदर्भाग्रद्वयमाज्येप्रक्षिप्य पुनर्ज्वलतातेनैवदर्भोल्मुकेनचरुणासहाज्यंत्रिःपर्यग्निकृत्वा तदुल्मुकमपास्य अपःस्पृष्ट्वा आज्यपात्रंभुविकर्षन्निवोदगुद्वास्यअंगारानग्नौप्रास्य तत्रस्थमेवाज्यं सवितुष्ट्वाहिरण्यस्तूपःसवितापुरउष्णिक्॥आज्यस्योत्पवनेविनियोगः ॥ ॐ सवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः ॥ प्रागुत्पुनाति सकृन्मंत्रेणद्विस्तूष्णीं प्रोक्ष्यपवित्रं स्कंदाय स्वाहा स्कंदायेदंनमम। ततआत्मनोग्रतोभूमिंप्रोक्ष्य तत्रबर्हिःसन्नहनींरज्जुमुदगग्रांप्रसार्य तस्यांबर्हिःप्रागग्रमुदगपवर्गमविरलमास्तीर्यतस्मिन्नाज्यपात्रंनिधाय स्रुवादिसंमार्जयेत् ॥ दक्षिणहस्तेनस्रुक्स्रुवौगृहीत्वासव्येनकांश्चिद्दर्भानादाय सहैवाग्नौप्रताप्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्रुचंनिधायस्रुवंवामहस्तेगृहीत्वा दक्षिणहस्तेनस्रुवस्यविलंदर्भाग्रैःप्रागादिप्रागपवर्गंत्रिःसंमृज्य अधस्ताद्दर्भाग्रैरेवाभ्यात्मंबिलपृ
ष्ठंत्रिःसंमृज्य ततोदर्भाणांमूलैर्दंडस्याधस्ताद्बिलपृष्ठादारभ्य यावदुपरिष्टाद्बिलंतावत्रिःसंमृज्य प्रोक्ष्यप्रताप्य आज्यस्थाल्याउत्त
रतोनिधाय तैरेवदर्भैर्जुहूंचैवमेवसंमृज्य प्रोक्ष्य प्रताप्य स्रुवादुत्तरतोनिधाय दर्भानद्भिःक्षालयित्वाऽग्नावनुप्रहरेत् ॥ ततः
सुश्रुतंचरुंस्रुवगृहीतेनाज्येनाभिघार्य उदगुद्वास्य अग्न्याज्ययोर्मध्येननीत्वा आज्याद्दक्षिणतोबर्हिषिसांतरमासाद्य पुनरप्यभि
घार्यनवाभिघार्य अग्न्यायतनादेकादशांगुलमितेदेशेऽग्निंसमंत्रमभ्यर्चयेत् ॥ विश्वानिनइतितिसृणांवसुश्रुतोग्निस्त्रिष्टुप् द्वयो
रर्चनेंऽत्यायाउपस्थानेविनियोगः ॥ ॐ विश्वानिनोदुर्गहाजातवेदः । ॐ सिंधुंननावादुरितातिपर्षि । ॐ अग्नेअत्रिवन्नमसागृ
णानः । ॐ अस्माकंबोध्यवितातनूनां । ॐ यस्त्वाहृदाकीरिणामन्यमानः । ॐ अमर्त्यमर्त्योजोहवीमि । ॐ जातवेदोयशोअ
स्मासुधेहि । ॐ प्रजाभिरग्नेअमृतत्वमश्यां । ॐ यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवःस्योनं । अश्विनंसपुत्रिणंवीरवंतंगोमंतं
रयिंनशतेस्वस्ति । आत्मानंचालंकृत्य हस्तंप्रक्षाल्य इध्मबंधनरज्जुमिध्मस्थानेनिधायपाणिनेध्ममादाय मूलमध्याग्रेषुस्रुवेणत्रिर
भिघार्य मूलमध्ययोर्मध्यभागेगृहीत्वा ॥ अयंतेवामदेवोजातवेदाअग्निस्त्रिष्टुप् इध्महवनेविनियोगः । ॐ अयंतइध्मआत्माजा
तवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहा जातवेदसेग्नयइदंनमम । आघारहोमे
वायव्यकोणमारभ्याग्नेयकोणपर्यंतं प्रजापतिपदंमनसास्मरन्प्रजापतयेस्वाहा प्रजापतयइदंनमम। नैर्ऋतिकोणमारभ्यईशानी
कोणपर्यंतं प्रजापतयेस्वाहा प्रजापतयइदंनमम । उत्तरतःअग्नयेस्वाहा अग्नयइदंनमम । दक्षिणतःसोमायस्वाहा सोमायेदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमम ॥ अथप्रधानाज्यहोमः ॥ ॐ सावित्र्यैस्वाहा सावित्र्याइदंनमम । ॐ ब्रह्मणेस्वाहा ब्रह्मणइदंनमम । ॐ श्रद्धायैस्वाहा श्रद्धायाइदंनमम । ॐ मेधायैस्वाहा मेधायाइदंनमम । ॐ प्रज्ञायैस्वाहा प्रज्ञायाइदंनमम । ॐ धारणायैस्वाहा धारणाया इदंनमम । ॐ सदसस्पतयेस्वाहा सदसस्पतयइदंनमम । ॐ अनुमतयेस्वाहा अनुमतयइदंनमम । ॐ छंदोभ्यऋषिभ्यःस्वाहा छंदोभ्यऋषिभ्यइदंनमम॥ (अथपंचावत्तीचेत्तिष्ठन्॥ ॐप्रसूतोभक्षमकरंचरावपिस्तोमंचेमंप्रथमःसूरिरुन्मृजे। सुतेसातेनयद्या गमंवांप्रतिविश्वामित्रजमदग्नीदमे। इतिपठित्वोपविश्यएकमवदानमधिकंगृह्यतामित्याचार्यंप्रार्थयेत्) ततःस्रुवेणस्रुच्याज्यमु पस्तीर्यचरुंद्विरवदायपात्रस्थमभिघार्यअवत्तंचाभिघार्य (पंचावत्तीचेत्तदाचरुंत्रिरवदाय) ॥ अग्निमीळेवैश्वामित्रोमधुच्छंदाअ ग्निर्गायत्री उत्सर्जनप्रधानगृहसिद्धचरुहोमेविनियोगः ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं । होतारंरत्नधातमंस्वाहा ॥ अग्नयइदंनमम ॥ १ ॥ कुषुंभकस्तदगस्त्योऽसृणसूर्याअनुष्टुप् उत्सर्जनप्रधानगृह० ॥ ॐ कुषुंभकस्तदब्रवीद्गिरेःप्रवर्तमानकः । वृश्चिकस्यारसंविषमरसंवृश्चिकतेविषंस्वाहा । असृणसूर्येभ्यइदंनमम ॥ २ ॥ त्वमग्नेशौनकोगृत्समदोग्निर्जगती उत्सर्जन० ॥ ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिःस्वाहा ॥ अग्नय इदंनमम ॥ ३ ॥ आवदन्गृत्समदःशकुंतोजगती उत्सर्जनप्रधान० ॥ ॐ आवदस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचि किद्धिनः । यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराःस्वाहा ॥ शकुंतायेदंनमम ॥४॥ सोमस्यमागाथिनोविश्वामित्रो ग्निस्त्रिष्टुप् उत्सर्जन० ॥ ॐ सोमस्यमातवसंवक्ष्यग्नेवह्निंचकर्थविदथेयजध्यै ॥ देवाँअच्छादीद्यद्युजेअद्रिंशमायेअग्नेतन्वंजुषस्व

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाहा ॥ अग्नयइदंनमम ॥ ५ ॥ गृणानाभार्गवोजमदग्निर्मित्रावरुणौगायत्री उत्सर्जन० ॥ ॐ गृणानाजमदग्निनायोनावृतस्य सीदतं । पातंसोममृतावृधास्वाहा । मित्रावरुणाभ्यामिदंनमम ॥ ६ ॥ त्वांह्यग्नेगोतमोवामदेवोग्निरष्टी तत्सर्जन० ॥ ॐ त्वांह्यग्नेसदमित्समन्यवोदेवासोदेवमरतिंन्येरिरइतिक्रत्वान्येरिरे । अमर्त्यंयजतमर्त्येष्वादेवमादेवंजनतप्रचेतसंविश्वमादेवं जनतप्रचेतसंस्वाहा ॥ अग्नयइदंनमम ॥७॥ धामंतेगोतमोवामदेवआपोजगती उत्सर्जन० ॥ ॐ धामंतेविश्वंभुवनमधिश्रि तमंतःसमुद्रेहृद्यंतरायुषि । अपामनीकेसमिथेयआभृतस्तमश्यामधुमंततऊर्मिंस्वाहा ॥ अद्भ्यइदंनमम ॥ ८ ॥ अवोध्यात्रे योबुधगविष्ठिरावग्निस्त्रिष्टुप् तत्सर्जन० ॥ ॐ अवोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं । यह्वाइवप्रवयामुजिहानाप्रभानवःसिस्रतेनाकमच्छस्वाहा ॥ अग्नयइदंनमम ॥ ९ ॥ गंतानआत्रेयएवयामरुन्मरुतोतिजगती उत्सर्जन० ॥ ॐ गंतानोयज्ञंयज्ञियाःसुशमिश्रोताहवमरक्षएवयामरुत् । ज्येष्ठासोनपर्वतासोव्योमनियूयंतस्यप्रचेतसःस्यातदुर्धर्तवोनिदःस्वाहा ॥मरुद्भ्य इदंनमम ॥ १० ॥ त्वंह्यग्नेवार्हस्पत्योभारद्वाजोग्निस्त्रिष्टुप् उत्सर्जन० ॥ ॐ त्वंह्यग्नेप्रथमोमनोतास्याधियोअभवोदस्महोता । त्वंसीवृषन्नकृणोर्दुष्टरीतुसहोविश्वस्मैसहसेसहध्यैस्वाहा ॥ अग्नयइदंनमम ॥ ११ ॥ योनःस्वःपायुर्भारद्वाजोविश्वेदेवाअनुष्टुप् उत्सर्जन० ॥ ॐ योनःस्वोअरणोयश्चनिष्ट्योजिघांसति । देवास्तंसर्वेधूर्वतुब्रह्मवर्ममममांतरंस्वाहा ॥ विश्वेभ्योदेवेभ्यइदंनमम ॥ १२ ॥ अग्निंनरोमैत्रावरुणिर्वसिष्ठोग्निर्विराट् उत्सर्जन० ॥ ॐ अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयंतप्रशस्तं । दूरेदृशं

उत्सर्जन.

॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहपतिमथर्युस्वाहा ॥ अग्नयइदंनमम ॥ १३ ॥ प्रतिचक्ष्वमैत्रावरुणिर्वसिष्ठेंद्रासोमावनुष्टुप् उत्सर्जन० ॥ ॐ प्रतिचक्ष्वविच क्ष्वेंद्रश्चसोमजागृतं । रक्षोभ्योवधमस्यतमशनिंयातुमद्भ्यःस्वाहा ॥ इंद्रासोमाभ्यामिदंनमम ॥१४॥ माचित्काण्वःप्रगाथइंद्रो बृहती उत्सर्जन० ॥ ॐ माचिदन्यद्विशंसतसखायोमारिषण्यत । इंद्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशंसतस्वाहा ॥ इंद्रा येदंनमम ॥ १५ ॥ आग्नेयाह्यांगिरसःसौभरिरग्नामरुतोनुष्टुप् उत्सर्जनप्रधान० ॥ ॐ आग्नेयाहिमरुत्सखारुद्रेभिःसोमपीतये । सोभर्याउपसुष्टुतिंमादयस्वस्वर्णरेस्वाहा ॥ अग्नामरुद्भ्यइदंनमम ॥१६॥ स्वादिष्ठयमधुच्छंदाःपवमानःसोमोगायत्री उत्सर्जन प्रधानगृह० ॥ ॐ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया । इंद्रायपातवेसुतःस्वाहा । पवमानायसोमायेदंनमम ॥१७॥ यत्तेरा जन्मारीचःकश्यपःपवमानःसोमःपंक्तिः उत्सर्जन०॥ॐ यत्तेराजन्च्छृतंहविस्तेनसोमाभिरक्षनः । अरातीवामानस्तारीन्मोचनः किंचनामममदिंद्रायेंदोपरिस्रवस्वाहा॥पवमानायसोमायेदं०॥१८॥अग्नेबृहन्नाद्यस्त्रितोग्निस्त्रिष्टुप् उत्सर्जन०॥ॐअग्नेबृहन्नुषसा मूर्ध्वोअस्थान्निर्जगन्वान्तमसोज्योतिषागात्॥अग्निर्भानुनारुशतास्वंगआजातोविश्वासद्मान्यप्राःस्वाहा॥अग्नयइदंनमम॥१९ समानीवःसंवननःसंज्ञानमनुष्टुष् उत्सर्जनप्रधानगृहसिद्धचरुहोमेविनियोगः ॥ ॐ समानीवआकूतिःसमानाहृदयानिवः । समानमस्तुवोमनोयथावःसुसहासति[1]स्वाहा ॥ संज्ञानायेदंनमम ॥ २० ॥ स्विष्टकृतंद्विरभिघार्य ॥ यदस्येतिहिरण्यर्भोग्निःस्वि

१ अत्रोक्तंभट्टकुमारिलगृह्यकारिकासु–शाकलानांसमानीवइत्यृचांत्याहुतिर्भवेत् । वाष्कलानांतुतच्छंयोरित्यृचांत्याहुतिर्भवेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्टकृदतिधृतिः स्विष्टकृद्धोमेविनियोगः ॥ ॐ यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं । अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वंस्विष्टंसुहुतंकरोतुमे । अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्धयित्रेसर्वान्नःकामान्त्समर्धयस्वाहा ॥स्विष्टकृतेग्नयइदंनमम ॥ त्रिसंनहनेनरुद्रं रुद्रायस्वाहा ॥ रुद्रायेदंनमम । अपउपस्पृश्य ॥ सर्वैःसहप्राणानायम्य ॥ पृथ्वीतिमंत्रस्यमेरुपृष्ठऋषिः कूर्मोदेवता सुतलंछंदः आसनेविनियोगः । ॐ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता । त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः । येभूताविघ्नकर्तारस्तेगच्छंतुशिवाज्ञया ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं । सर्वेषामविरोधेनब्रह्मकर्मसमारभे॥शरावेजलंदर्भांश्चादाय ॥ विद्युदसिविद्यमेपाप्मानमृतात्सत्यमुपैमि इतितज्जलमुपस्पृश्य दर्भगर्भब्रह्मांजलिंकृत्वादक्षिणांकेनिधाय प्रणवादिस्वयंपठन्नन्यानप्युपविष्टान्वाचयेत् ॥ प्रणवस्यपरब्रह्मऋषिःपरमात्मादेवतादैवीगायत्रीछंदः समस्तव्याहृतीनांप्रजापतिःप्रजापतिर्बृहतीगायत्र्याविश्वामित्रःसवितागायत्री अग्निमीळइत्यादीनांछंदसांमधुच्छंदादयऋषयः अग्न्यादयोदेवताः गायत्र्यादीनिछंदांसि सर्वेषामुत्सर्जनेविनियोगः॥ ॐ भूर्भुवःस्वःतत्सवितुवरेण्यं। भर्गोदेवस्यधीमहि। धियोनःप्रचोदयात् । ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोदयात् । ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्॥ॐ अग्निमीळेपुरोहितं । यज्ञस्यदेवमृत्विजं । होतारंरत्नधातमं । अग्निःपूर्वेभिर्ऋषिभिः । ईड्योनूतनैरुत । सदेवाँएहवक्षति । अग्निनारयिमश्नवत् । पोषमेवदिवेदिवे । यशसंवीरवत्तमं।अग्नेयंयज्ञमध्वरं । विश्वतःपरिभूरसि॥सइद्देवेषुगच्छति । अग्निर्होताकविक्रतुः । सत्यश्चित्रश्रवस्तमः । देवोदेवेभिरागमत्॥१॥ यदंग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दाशुषेत्वं । अग्नेभद्रकरिष्यसि । तवेत्तत्सत्यमंगिरः । उपत्वाग्नेदिवेदिवे । दोषावस्तार्धियावयं । नमोभरंतएमसि । राजंतमध्वराणां । गोपामृतस्यदीदिविं । वर्धमानंस्वेदमे । सनःपितेवसूनवे । अग्नेसूपायनोभव । सचस्वानःस्वस्तये ॥ २ ॥ वायवायाहिदर्शत ॥ अग्निर्वैदेवानामवमोविष्णुःपरमः । अथमहाव्रतं । एषपंथाएतत्कर्म । अथातःसंहितायाउपनिषत् । विदामघवन्विदा । महाव्रतस्यपंचविंशतिंसामिधेन्यः । इषेत्वोर्जेत्वा । अग्नआयाहिवीतये । शन्नोदेवीरभिष्टये।अथैतस्यसमाम्नायस्य । समाम्नायःसमाम्नातः । मयरसतजभनलगसंमितं । गौः । ग्मा । पंचसंवत्सरमयं । अथशिक्षांप्रवक्ष्यामि । वृद्धिरादैच् । यदिंद्रोदाशराज्ञेमानुषंव्यगाहथाः । इदंजनाउपश्रुत)। योगीश्वरंयाज्ञवल्क्यं । नारायणंनमस्कृत्य । अथातोधर्मंध्याख्यास्यामः । अथातोधर्मजिज्ञासा । अथातोब्रह्मजिज्ञासा । तच्छंयोरावृणीमहेगातुंयज्ञायगातुंयज्ञपतये दैवीस्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः । ऊर्ध्वंजिगातुभेषजंशंनोअस्तुद्विपदेशंचतुष्पदे । ॐ नमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः । नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि ॥ इतित्रिः ॥ ॐ शांतिःशांतिःशांतिः । वृष्टिरसिवृश्चमेपाप्मानमृतात्सत्यमुपागाम् । सर्वे उत्सृष्टावैवेदाः इत्युक्त्वाजलंस्पृशेयुः । ततःअयाश्चेतिविमदोऽयाअग्निःपंक्तिः प्रायश्चित्ताज्यहोमेविनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि । अयासावयसाकृतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा ॥ अयासेऽग्नयइदंनमम ॥ अतोदेवामेधातिथिर्देवागायत्री प्रायश्चित्ताज्यहोमेविनियोगः । ॐ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे । पृथिव्याःसप्तधामभिःस्वाहा । देवेभ्यइदंनमम ॥ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री प्रायश्चित्ताज्यहोमेविनियोगः । ॐइदंविष्णुर्विचक्रमे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रेधानिदधेपदं। समूढमस्यपांसुरेस्वाहा॥ विष्णवइदंनमम ॥ व्यस्तसमस्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजप्रजापतयऋ
षयः अग्निवायुसूर्यप्रजापतयोदेवताः गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि प्रायश्चित्ताज्यहोमेविनियोगः। ॐ भूःस्वाहा। अग्नय
इदंनमम ॥ ॐ भुवःस्वाहा। वायवइदंनमम ॥ ॐ स्वःस्वाहा। सूर्यायेदंनमम ॥ ॐ भूर्भुवःस्वःस्वाहा। प्रजापतयइदंनमम ॥
अनाज्ञातमितिमंत्रद्वयस्यहिरण्यगर्भोऽग्निरनुष्टुप् ज्ञाताज्ञातदोषनिर्बर्हणार्थंप्रायश्चित्ताज्यहोमेविनियोगः। ॐ अनाज्ञातंयदाज्ञा
तंयज्ञस्यक्रियतेमिथु। अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳस्वाहा॥ अग्नयइदंनमम॥ॐ पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः
अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳस्वाहा॥अग्नयइदंनमम॥यत्पाकत्रेत्याष्टयस्त्रितोग्निस्त्रिष्टुप् प्रायश्चित्ताज्यहोमेविनियोगः
ॐ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्तासः। अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाँऽऋतुशोयजातिस्वाहा॥ अग्नय
इदंनमम॥यद्वोदेवाअभितपामरुतस्त्रिष्टुप् प्रायश्चित्ताज्यहोमेविनियोगः। ॐयद्वोदेवाअतिपातयानिवाचाचप्रयुतीदेवहेळनं।
अरायोअस्माँअभिदुच्छुनायतेन्यत्रास्मन्मरुतस्तन्निधेतनस्वाहा॥ मरुद्भ्यइदंनमम ॥ (यज्ञोपघातादौप्रायश्चित्तानि। अस्मि
न्कर्मणिकृमिकीटपिपीलिकामक्षिकाद्युपघातदोषपरिहारार्थंद्वेमिंदाहुतीहोष्यामि। ॐयन्मआत्मनोमिंदाभूदग्निस्तत्पुनराहार्जा
तवेदाविर्चर्षणिःस्वाहा॥ मिंदवतेग्नयइदंनमम॥ ॐपुनरग्निश्चक्षुरदात्पुनरिंद्रोबृहस्पतिः। पुनर्मेअश्विनायुवंचक्षुराधत्तमक्ष्योः
स्वाहा॥ मिंदवतेग्नयइदंनमम ॥ अस्मिन्कर्मणिस्वराक्षरपदवर्णभ्रेषजनितप्रत्यवायपरिहारार्थंआभिर्गीर्भिरित्येकामाज्याहुतिं
होष्यामि ॥ ॐ आभिर्गीर्भिर्यदतोनऊनमाप्यांययहरिवोवर्धमानः। यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधतेस्याम

उत्सर्जन.

॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाहा ॥ इंद्रायहरिवतइदंनमम ॥) सांगतासिद्ध्यर्थंसर्वप्रायश्चित्तंकरिष्ये ॥ ॐ भूर्भुवःस्वःस्वाहा ॥ प्रजापतयइदंनमम ॥ संस्रावेण ॐ विश्वेभ्योदेवेभ्यःस्वाहा ॥ विश्वेभ्योदेवेभ्यःसंस्रावभाग्भ्यइदंनमम ॥ हविःशेषमुदगुद्वास्यवर्हिषिपूर्णपात्रंनिनयेत् ॥ पूर्णमसिपूर्णमेभूयाःसुपूर्णमसिसुपूर्णमेभूयाःसर्वमसिसर्वमेभूयाः ॥ अक्षितिरसिमामेक्षेष्ठाः ॥ प्राच्यांदिशिदेवाऋत्विजोमार्जयंतां । दक्षिणस्यांदिशिमासाःपितरोमार्जयंतां । अपउपस्पृश्य । प्रतीच्यांदिशिग्रहाःपशवोमार्जयंतां । उदीच्यांदिश्यापओषधिवनस्पतयोमार्जयंतां । ऊर्ध्वायांदिशियज्ञःसंवत्सरःप्रजापतिर्मार्जयंतां । आपोअस्मानित्यस्यदेवश्रवा आपस्त्रिष्टुप् मार्जनेविनियोगः ॥ ॐ आपोअस्मान्मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु । विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि ॥ इदमापःसिंधुद्वीपआपोनुष्टुप् मार्जनेविनियोगः ॥ ॐ इदमापःप्रवहतयत्किंचदुरितंमयि । यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं । सुमित्र्यानआपओषधयःसंतु । दुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टि । यंचवयंद्विष्मस्तंहन्मि । इतिनैर्ऋत्यांदिशिकुशाग्रैरपःसिंचेत् ॥ माहंप्रजांपरासिचंयानःसयावरीस्थन । समुद्रेवोनिनयानिस्वंपाथोअपीथ ॥ ताआपःसमुद्रंगच्छेयुरिति चिन्तयन् गंगायमुनासरस्वत्यःस्मरन् अंजलिस्थजलैरात्मानमन्यांश्चमार्जयेत् । ततः अग्नेर्वायव्यदेशेतिष्ठन् ॥ अग्नेत्वंनइति चतसृणांगौपायनालौपायनावाबंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुश्चैकैकर्चाऋषयःअग्निर्देवता द्विपदाविराट्छंदः अग्न्युपस्थानेविनियोगः ॥ ॐ अग्नेत्वंनोअंतमउतत्राताशिवोभवावरूथ्यः । वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमंरयिंदाः ॥ सनोबोधिश्रुधीहवमुरुष्याणोअघायतःसमस्मात् ॥ तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः ॥ उपविश्यपरिस्तरणान्युत्तरेविसृजेत् ॥परिस

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूहनपर्युक्षणेकृत्वा विश्वानिनइत्यग्निंगंधादिभिश्चपूजयित्वा ॥ ॐ अग्निस्तुविश्रवस्तमंतुविब्रह्माणमुत्तमम् । अतूर्तश्रावयत्पेतिं पुत्रंददातिदाशुषे ॥ अग्निर्ददातिसत्पतिंसासाहयोयुधानृभिः । अग्निरत्यंरघुष्यदंजेतारमपराजितं ॥ अग्नयेनमःमंत्रपुष्पंसमर्पयामि । मानस्तोकइत्यस्यकुत्सोरुद्रोजगती विभूतिग्रहणेविनियोगः ॥ ॐ मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः । वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे ॥ त्र्यायुषंजमदग्नेरितिललाटे । कश्यपस्यत्र्यायुषं कंठे । अगस्त्यस्यत्र्यायुषं नाभौ । यद्देवानांत्र्यायुषं दक्षिणस्कंधे । तन्मेअस्तुत्र्यायुषं वामस्कंधे । सर्वमस्तुशतायुषं शिरसि । ॐ चमेस्वरश्चमेयज्ञोपचतेनमश्च । यत्तेन्यूनंतस्मैतउपयत्तेतिरिक्तंतस्मैतेनमः । अग्नयेनमः । ॐ स्वस्ति । श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन ॥ देहिमेहव्यवाहनोन्नमइति ॥ प्रमदात्कुर्वतांकर्मप्रच्यवेताध्वरेषु यत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै ॥ यानितेषामशेषाणांकृष्णानुस्मरणंपरं ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं ॥ अनेनउत्सर्जनहोमाख्येन कर्मणाभगवान्श्रीपरमेश्वरःप्रीयतांनमम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ८ ॥

॥ अथस्नानविधिः ॥

श्रीः ॥ भस्मगोमयमृत्तंदुलतिलकुशदूर्वादिसंभृतसंभारः उदकतीरंगत्वा सर्वैःसहआचम्यप्राणानायम्यदेशकालौसंकीर्त्य उत्सर्जनांगत्वेनसर्वैःसहगणस्नानंकरिष्ये ॥ आपोहिष्ठेतितृचेनस्नात्वा आचम्य ॥ उत्सर्जनांगत्वेनभस्मस्नानंकरिष्ये ॥ भस्मादाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् । शिरसि । ॐ तत्पुरुषाय विद्महेमहादेवायधीमहि । तन्नोरुद्रःप्रचोदयात् । मुखे । ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः । सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः । हृदये । ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः । गुह्ये । ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः । भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः । पादयोः ॥ अग्निरितिभस्म वायुरितिभस्म जलमितिभस्म स्थलमितिभस्म व्योमेतिभस्म सर्वꣳहवाइदंभस्मा।ॐमानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः।वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे ॥ सर्वांगेविलिप्य स्नात्वा आचम्य ॥ उत्सर्जनांगत्वेनगोमयस्नानंकरिष्ये ॥ ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं । ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं । इतिगोमयमादाय ॥ अग्रमग्रंचरंतीनामोषधीनांवनेवने ॥ तासामृषभपत्नीनांपवित्रंकायशोधनं ॥ तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा ॥ इतिशिरःप्रभृत्यंगानिविलिप्य स्नात्वा आचम्य ॥उत्सर्जनांगत्वेनमृत्तिकास्नानं मृत्संस्कारंचकरिष्ये॥ॐ बळित्थापर्वतानांखिद्रंबिभर्षिपृथिवि ।प्रयाभूमिप्रवत्वतिमह्नाजिनोषिमहिनि ॥ इतिभूमिंप्रार्थ्य ॥ ॐ मावोरिषत्खनितायस्मैचाहंखनामिवः । द्विपच्चतुष्पदस्माकंसर्वमस्त्वनातुरं । इतिखनित्वा ॥ ॐ स्योनापृथिविभवानृक्षरानिवेशनी । यच्छानःशर्मसप्रथः । इतिमृदमादाय ॥ ॐ आयनेतेपरायणेदूर्वारोहंतुपुष्पिणीः । ह्रदाश्चपुंडरीकाणिसमुद्रस्यगृहाइमे । इतिदूर्वामादाय ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोदयात् । प्रोक्ष्यभूमौनिधाय ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं। ह्वयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः ॥ पूर्वतःक्षिपेत् ॥ ॐ यमा यसोमंसुनुतयमायजुहुताहविः । यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः । दक्षिणतः ॥ ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्ते यजमानोहविर्भिः । अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः । पश्चिमतः ॥ ॐ वयंसोमव्रतेतवमनस्तनूषुबिभ्रतः । प्रजावंतःसचेमहि । उत्तरतः ॥ ॐ तत्सूर्यरोदसीउभेदोषावस्तोरुपब्रुवे । भोजेष्वस्माँऽअभ्युच्चरासदा । उपरिष्टात् ॥ ॐ अधः पश्यस्वमोपरिसंतरांपादकौहर । मातेकशप्लकौदृशन्स्त्रीहिब्रह्मावभूविथ । अधः॥ (सर्वैर्मृदंवामहस्तेगृहीत्वाजलेनार्द्रीकृत्य) ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं । शिरसि ॥ ॐ अक्षीभ्यांतेनासिकाभ्यांकर्णा भ्यांछुबुकादधि । यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वायाविवृहामिते । मुखे ॥ ॐ ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योअनूक्यात् । यक्ष्मंदोषण्यंमंसाभ्यांबाहुभ्यांविवृहामिते ॥ कंठे ॥ ॐ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि । यक्ष्ममंतस्राभ्यांयक्नःप्लाशि भ्योविवृहामिते । हृदये ॥ ॐ नाभानाभिनआददेचक्षुश्चित्सूर्येसचा । कवेरपत्यमादुहे । नाभौ ॥ ॐ त्वमिंद्रसजोषसमर्कंवि भर्षिबाह्वोः । वज्रंशिशानओजसा । बाह्वोः ॥ ॐ सोमानंस्वरणंकृणुहिब्रह्मणस्पते । कक्षीवंतंयऔशिजः । कक्ष्योः ॥ ॐ यः कुक्षिःसोमपातमःसमुद्रइवपिन्वते । उर्वीरापोनकाकुदः । कुक्ष्योः ॥ ॐ बह्वीनांपितावहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्यं । इषुधिःसंकाःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः । पृष्ठे ॥ ॐ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां । यक्ष्मंश्रोणिभ्यां भासदाद्भंससोविवृहामिते । ऊर्वोः ॥ ॐ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः । यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जान्वोः ॥ ॐ एतावानस्यमहिमातोज्यायांश्चपूरुषः । पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि । पादयोः ॥ ॐ यस्यविश्वा निहस्तयोःपंचक्षितीनांवसु ॥ स्पाशयस्वयोअस्मद्भ्रुग्दिव्येवाशनिर्जहि । हस्तयोः ॥ ॐ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि । यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते । इतिमंत्रेणपुरुषसूक्तेनचसर्वांगेविलिप्य । अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे । शिरसाधारयिष्यामिरक्षस्वमांपदेपदे । इतिसतिलदूर्वामृदंशिरसिनिधाय मृत्तिकास्थानंप्रक्षाल्य भूमिंप्रार्थयेत् ॥ भूमिर्धेनुर्धरणीलोकधारिणी । उद्धृतासिवराहेणकृष्णेनशतबाहुना । मृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतं । मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता ॥ मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं । मृत्तिकेप्रतिष्ठितेसर्वंतन्मेनिर्णुदमृत्तिके ॥ त्वयाहतेनपापेनगच्छामिपरमांगतिं ॥ तीर्थंप्रार्थयेत् ॥ ॐ हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः । यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः । यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं । तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनः । नमोग्नयेप्सुमतेनमइंद्रायनमोवरुणायनमोवारुण्यैनमोद्भ्यः । यदपांक्रूरंयदमेध्यंयदशांतंतदपगच्छतात् ॥ अत्याशनादतीपानाद्यच्चउग्रात्प्रतिग्रहात् ॥ तन्नोवरुणोराजापाणिनाह्यवमर्शतु ॥ सोहमपापोविरजोनिर्मुक्तोमुक्तकिल्विषः । नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां । यश्चाप्सुवरुणःसपुनात्वघमर्षणः ॥ अवतेहेळइतिद्वयोराजीगर्तिःशुनःशेपोवरुणस्त्रिष्टुप् वरुणप्रार्थनेविनियोगः ॥ ॐ अवतेहेळोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः । क्षयंनस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथःकृतानि ॥ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय । अथावयमादित्यव्रतेतवानागसोअदितयेस्याम ॥ याःप्रवतोवसिष्ठोनद्यःशक्करी तीर्थाभिमर्शनेविनियोगः ॥ ॐ याःप्रवतोनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वतउद्धतउदन्वतीरनुदकाश्चयाः । ताअस्मभ्यंपयसापिन्वमानाःशिवादेवीरशिपदाभवंतुसर्वानद्योअशिमिदाभवंतु ॥ इमंमेगंगइतिद्वयोःसिंधुक्षित्प्रैयमेधोनद्योजगती तीर्थावलोडनेविनियोगः ॥ ॐ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या । असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ सितासितेसरितेयत्रसंगथेतत्राप्लुतासोदिवमुत्पतंति । येवैतन्वंविसृजंतिधीरास्तेजनासोअमृतत्वंभजंते ॥ सागरस्वननिर्घोषदंडहस्तासुरांतक । जगत्स्रष्टर्जगन्मर्दिन्नमामित्वांसुरेश्वर ॥ इमंमंत्रंसमुच्चार्यतीर्थेस्नानंसमाचरेत्॥अन्यथातत्फलस्यार्धंतीर्थेशोहरतिध्रुवं॥ ॐ इदंतेन्याभिरसमानमद्भिर्याःकाश्चसिंधुंप्रवहंतिनद्यः ॥ सर्पोजीर्णामिवत्वंचजहातिपापंसशिरस्कोभ्युपेत्य ॥ नंदिनीनलिनीसीतामालतीचमलापहा । विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी । भागीरथीभोगवतीजाह्नवीत्रिदशेश्वरी । पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा । आगच्छंतुपवित्राणिस्नानकालेसदामम । गंगागंगेतियोब्रूयाद्योजनानांशतैरपि । मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ आपोहिष्ठेतितृचस्यांबरीषःसिंधुद्वीपआपोगायत्री मार्जनेविनियोगः॥ॐ आपोहिष्ठा० ऋ० ३॥ समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रिष्टुप् । मार्जनेवि० ॥ ॐ समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः । इंद्रोयावज्रीवृषभोरराद्ताआपोदेवीरिहमामवंतु॥याआपोदिव्याउतवास्रवंतिखनित्रिमाउतवायाःस्वयंजाः । समुद्रार्थायाःशुचयःपावकास्ताआपोदेवीरिहमामवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यञ्जनानां । मधुश्चुतःशुचयोयाःपावकास्ताआपोदेवीरियमामवंतु ॥ यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जमदंति । वैश्वानरोयास्वग्निःप्रविष्टस्ताआपोदेवीरिहमामवंतु ॥ तरत्समंदीतिचतसृणांकाश्यपावत्सारःपवमानःसोमो

उत्सर्जन.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्री मार्जनेवि० ॥ ॐ तरत्समंदीधावतिधारासुतस्यांधसः । तरत्समंदीधावति ॥ उस्रावेदवसूनांमर्तस्यदेव्यवसः । तरत्समंदीधावति ॥ ध्वस्रयोःपुरुषंत्योरासहस्राणिदद्महे । तरत्समंदीधावति ॥ आययोस्त्रिंशतंतनासहस्राणिचदद्महे । तरत्समंदीधावति ॥ एतोन्विंद्रमितितिसृणामांगिरसइंद्रोनुष्टुप् मार्जनेवि० ॥ ॐ एतोन्विंद्रंस्तवामशुद्धंशुद्धेनसाम्ना । शुद्धैरुक्थैर्वावृध्वांसंशुद्धआशीर्वान्ममत्तु ॥ इंद्रंशुद्धोनआगहिशुद्धःशुद्धाभिरूतिभिः ॥ शुद्धोरयिंनिधारयशुद्धोममद्भिसोम्यः ॥ इंद्रंशुद्धोहिनोरयिंशुद्धोरत्नानिदाशुषे । शुद्धोवृत्राणिजिघ्नसेशुद्धोवाजंसिषाससि ॥ ऋतंचेतितृचस्याघमर्षणोभाववृत्तमनुष्टुप् अघमर्षणे विनियोगः ॥ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत । ततोरात्र्यजायततःसमुद्रोअर्णवः । समुद्रादर्णवादधिसंवत्सरोअजायत । अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोस्वः ॥ स्नात्वा स्नानांगतर्पणंकुर्यात् ॥ ब्रह्मादयोयेदेवाः तान्देवांस्तर्पयामि भूर्देवांस्तर्पयामि भुवर्देवांस्तर्पयामि स्वर्देवांस्तर्पयामि भूर्भुवःस्वर्देवांस्तर्पयामि ॥ निवीती कृष्णद्वैपायनादयोयेऋषयः तान्ऋषींस्तर्पयामि भूर्ऋषींस्तर्पयामि भुवर्ऋषींस्तर्पयामि स्वर्ऋषींस्तर्पयामि भूर्भुवःस्वर्ऋषींस्तर्पयामि ॥ प्राचीनावीती ॥ सोमःपितृमान्यमोंगिरस्वानग्निष्वात्ताःकव्यवाहनादयोयेपितरः ॥ तान्पितृंस्तर्पयामि ॥ भूःपितृंस्तर्पयामि ॥ भुवःपितृंस्तर्पयामि ॥ स्वःपितृंस्तर्पयामि ॥ भूर्भुवःस्वःपितृंस्तर्पयामि ॥ अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिं ॥ इतिजलांजलिंतटेनिक्षिप्य ॥ येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः ॥ तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकं ॥ इतिमंत्रेणोत्तरीयवस्त्रंतटेनिष्पीड्य ॥ ततःयज्ञोपवीती ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्मयादूषितंतोयंशारीरमलसंभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं ॥ इतियक्ष्मतर्पणंकृत्वा ॥ ज्ञानतोऽज्ञानतोवापि यन्मेदुश्चरितंकृतं ॥ तत्क्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते ॥ इतिनदींप्रार्थयेत् ॥ स्नानविधिःसमाप्तः ॥ ॥ ॥ छ ॥

॥ अथऋषिपूजनम् ॥

श्रीः ॥ धृतशुक्लांबरोनिवीतीऋषीन्पूजयेत् ॥ देशकालौसंकीर्त्य उत्सर्जनांगत्वेनारुंधतीसहितकश्यपादिसप्तर्षिप्रीत्यर्थंआवाहनादिषोडशोपचारैःपूजनंकरिष्ये ॥ ॐ ऋषेमंत्रकृतांस्तोमैःकश्यपोद्वर्धयन्गिरः ॥ सोमंनमस्यराजानंयोजज्ञेवीरुधांपतिरिंद्रायेंदोपरिस्रव ॥ कश्यपायनमः कश्यपंआवाहयामि ॥ ॐ अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेवयोषा ॥ श्येनस्यचिज्जवसानूतनेनागच्छतमश्विनाशंतमेन ॥ अत्रयेनमः अत्रिंआवाहयामि ॥ ॐ एवानःस्पृधःसमजासमत्स्विद्रारारंधिमिथतीरदेवीः । विद्यामवस्तोरवसागृणंतोभरद्वाजाउततइंद्रनूनं ॥ भरद्वाजायनमः भरद्वाजंआवाहयामि ॥ ॐ प्रसूतोभक्षमकरंचरावपिस्तोमंचेमंप्रथमःसूरिरुन्मृजे । सुतेसातेनयद्यागमंवांप्रतिविश्वामित्रजमदग्नीदमें ॥ विश्वामित्रायनमः विश्वामित्रंआवाहयामि ॥ ॐ अभित्वागोतमागिराजातवेदोविचर्षणे । द्युम्नैरभिप्रणोनुमः ॥ गौतमायनमः गौतमंआवाहयामि ॥ ॐ गृणानाजमदग्निनायोनावृतस्यसीदतं । पातंसोममृतावृधा ॥ जमदग्नयेनमः जमदग्निंआवाहयामि ॥ ॐ उतासिमैत्रावरुणोवसिष्ठोर्वश्याब्रह्मन्मनसोधिजातः । द्रप्संस्कन्नंब्रह्मणादैव्येनविश्वेदेवाःपुष्करेत्वाददंत ॥ वसिष्ठायनमः वसिष्ठंआवाहयामि ॥ ॐ अत्रेर्यथानुसूयास्याद्वसिष्ठस्याप्यरुंधती । कौशिकस्ययथासतीतथात्वमपिभर्तरि ॥ अरुंधत्यैनमः अरुंधतींआवाहयामि ॥ तदस्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

मित्रा० गृहावै० सुप्रतिष्ठितमस्तु ॥ आवाहनादिप्रत्यूपचारं ॥ ॐ देवाप्रस्यापत्यंनंतौ

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रा० गृहावै० सुप्रतिष्ठितमस्तु ॥ आवाहनादिप्रत्युपचारं ॐ देवाएतस्यामवदंतपूर्वेसप्तऋषयस्तपसेयेनिषेदुः । भीमाजाया ब्राह्मणस्योपनीतादुर्धादधातिपरमेव्योमन् ॥ इतिमंत्रेणषोडशोपचारैःपूजयेत् ॥ इतिऋषिपूजा ॥ ॥ ॥ छ ॥

॥ अथऋष्यादितर्पणम् ॥

साक्षतहस्तःकुशमध्येन । कश्यपंतर्पयामि । अत्रिंतर्पयामि । भरद्वाजंतर्पयामि । विश्वामित्रंतर्पयामि । गौतमंतर्पयामि । जमदग्निंतर्पयामि । वसिष्ठंतर्पयामि। अरुंधतींतर्पयामि। उपवीतीदेवतीर्थेनकुशाग्रैः। सावित्रींतर्पयामि। ब्रह्माणंतर्पयामि। श्रद्धांतर्पयामि । मेधांतर्पयामि । प्रज्ञांतर्पयामि । धारणांतर्पयामि । सदसस्पतिंतर्पयामि । अनुमतिंतर्पयामि । छंदांस्यृषींस्तर्पयामि ॥ अग्निंतर्पयामि । अमृणसूर्यांस्तर्पयामि। अग्निंतर्पयामि। शकुंतंतर्पयामि । अग्निंतर्पयामि। मित्रावरुणौतर्पयामि । अग्निंतर्पयामि । अपस्तर्पयामि ।अग्निंतर्पयामि । मरुतस्तर्पयामि । अग्निंतर्पयामि । विश्वान्देवांस्तर्पयामि । अग्निंतर्पयामि । इंद्रासोमौतर्पयामि । इंद्रंतर्पयामि । अग्नामरुतस्तर्पयामि । पवमानसोमंतर्पयामि । पवमानसोमंतर्पयामि । अग्निंतर्पयामि । संज्ञानंतर्पयामि ॥ ॥ अथब्रह्मयज्ञांगतर्पणं । प्रजापतिस्तृप्यतु । ब्रह्मातृप्यतु । वेदास्तृप्यंतु । देवास्तृप्यंतु । ऋषयस्तृप्यंतु । सर्वाणिछंदांसितृप्यंतु । ओंकारस्तृप्यतु । वषट्कारस्तृप्यतु । व्याहृतयस्तृप्यंतु । सावित्रीतृप्यतु । यज्ञास्तृप्यंतु । द्यावापृथिवीतृप्यतां ।अंतरिक्षंतृप्यतु। अहोरात्राणितृप्यंतु । सांख्यास्तृप्यंतु । सिद्धास्तृप्यंतु । समुद्रास्तृप्यंतु। नद्यस्तृप्यंतु । गिर-

१ देवतीर्थमुक्तममरेण 'अंगुल्यग्रेतीर्थंदैवं' इति । ऋजुहस्तेनांगुल्यग्रगाभिरद्भिरित्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्तृप्यंतु । क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसस्तृप्यंतु । नागास्तृप्यंतु । वयांसितृप्यंतु । गावस्तृप्यंतु । साध्यास्तृप्यंतु । विप्रा स्तृप्यंतु । यक्षास्तृप्यंतु । रक्षांसितृप्यंतु । भूतानितृप्यंतु । एवमंतानितृप्यंतु ॥ अथर्षयः । निवीती । ऋषितीर्थेनकुशमध्येन । शतर्चिनस्तृप्यंतु । माध्यमास्तृप्यंतु । गृत्समदस्तृप्यतु । विश्वामित्रस्तृप्यतु । वामदेवस्तृप्यतु । अत्रिस्तृप्यतु भरद्वाजस्तृ प्यतु । वसिष्ठस्तृप्यतु । प्रगाथास्तृप्यंतु । पावमान्यस्तृप्यंतु । क्षुद्रसूक्तास्तृप्यंतु । महासूक्तास्तृप्यंतु ॥ प्राचीनावीती । (जीव त्पितृकैरंगुष्ठपर्यंतं) पितृतीर्थेनद्विगुणीकृतकुशमूलाग्रैः । सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृ प्यंतु । जानंतिवाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु । गर्गीवाचक्नवीतृप्यतु । वडवाप्रातीथेयीतृप्यतु । सुलभामैत्रेयीतृप्यतु । कहोळंतर्पयामि । कौषीतकंतर्पयामि । महाकौषीतकंतर्पयामि । पैंग्यंतर्पयामि । महापैंग्यंतर्पयामि । सुयज्ञंतर्पयामि । सांख्यायनंतर्पयामि । ऐतरेयंतर्पयामि । महैतरेयंतर्पयामि । शाकलंतर्पयामि । बाष्कलंतर्पयामि । सुजा तवक्रंतर्पयामि । औदवाहिंतर्पयामि । महौदवाहिंतर्पयामि । सौजामिंतर्पयामि । शौनकंतर्पयामि । आश्वलायनंतर्पयामि । येचान्येआचार्यास्तेसर्वेतृप्यंतु ॥ ततःस्वपितृतर्पणं ॥ अस्मत्पितरं अमुकशर्माणं अमुकगोत्रं वसुरूपं स्वधानमस्तर्पयामि । ३ । पितामहं अ०श०अ० गो० रुद्ररूपं स्व० । प्रपितामहं अ०श० अ० गो०आदित्यरूपं स्व० । मातरं अमुकदां अमुकगोत्रां

१ कनिष्ठांगुलिमूलगाभिरद्भिस्तर्पयेत् । २ अंगुष्ठांगुलिमध्यगाभिरद्भिः । ३ एकैकमंजलिंदेवेभ्योद्वौद्वावृषिभ्यस्त्रींस्त्रीन्पितृभ्यइतिनियमो बह्वृचांवैकल्पिकः । मातृत्रयीभिन्नस्त्रीणामेकैकोंजलिर्देयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसुरूपा स्व० । पितामहीं अ० अ० गो० रुद्ररूपां स्व० । प्रपितामहीं अ० अ० गो० आदित्यरूपां स्व० । सापत्नमातरं अ० अ० गो० वसुरूपां स्व० । मातामहं अमुकशर्माणं अमुकगोत्रं सपत्नीकं वसुरूपं स्व० । मातुःपितामहं अ० श० अ० गो० सप० रुद्ररूपं स्व० । मातुःप्रपितामहं अ०श०अ०गो०सप० आदित्यरूपं स्व० । पत्नीं अमुकदां अमुकगोत्रां वसुरूपां स्व० । सुतं अमुकशर्माणं अ०गो०सप० ससुतं वसुरूपं स्व० । दुहितरं अमुकदां अमुक० सभर्तृकां ससुतां वसुरूपां स्व० । पितृव्यं अ० श० अ०गो० सप० ससुतं वसुरूपं स्व० । मातुलं अ०श०अ०गो० सप० ससुतं वसु० स्व० । भ्रातरं अ० श० अ० गो० सप०ससुतं वसु०स्व०। पितृभगिनीं अमुकदां अमुकगोत्रां सभर्तृकां ससुतां वसुरूपां स्व० । मातृभगिनीं अमुकदां अमुकगोत्रां सभर्तृकां ससुतां वसुरूपां स्व० । आत्मभगिनीं अमुकदां अ० गो० स० ससु० वसु० स्व० । श्वशुरं अ० श० अ० गो० सप० ससुतं वसुरूपं स्व० । गुरुं अ० श० अ० गो० सप० ससुतं वसुरूपं स्व० । शिष्यं अमुकशर्माणं अ० गो० वसुरूपं स्व० । आप्तं अ० श० अ० गो० वसुरूपं स्वधानमस्तर्पयामि ॥ ॥ ततोयमतर्पणं । यमंतर्पयामि । धर्मराजंतर्पयामि । मृत्युंतर्पयामि । अंतकंतर्पयामि । वैवस्वतंतर्पयामि । कालंतर्पयामि । सर्वभूतक्षयंतर्पयामि । औदुंबरंतर्पयामि । दध्नंतर्पयामि । नीलंतर्पयामि । परमेष्ठिनंतर्पयामि । वृकोदरंतर्पयामि । चित्रंतर्पयामि । चित्रगुप्तंतर्पयामि ॥ ॥ यमोनिहंतापितृधर्मराजो वैवस्वतोदंडधरश्चकालः ॥ भूताधिपोदत्तकृतानुसारीकृतांतएतद्दशभिर्जपंति ॥ इतितिष्ठंतोदशवारंसर्वेजपेयुः ॥ ॐ आग्ना अग्नइहावसेहोत्रांयविष्ठभारतीं । वरूत्रींधिषणांवह ॥१॥ अधीवासंपरिमातूरिहन्नहंतुविग्रेभिःसत्वभिर्यातिविज्रयः ॥ वयो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दधत्पद्भ्यतेरेरिहत्सदानुश्येनीसचतेवर्तनीरह ॥ २ ॥ अयंयज्ञोदेवयाअयंमियेधइमाब्रह्माण्ययमिंद्रसोमः । स्तीर्णबर्हिरातुशक्र प्रयाहिपिबानिषद्यविमुचाहरीइह ॥ ३ ॥ अतीयामनिदस्तिरःस्वस्तिभिर्हित्वावद्यमरातीः । वृष्टीशंयोरापउस्त्रिभेषजंस्याममरुतःसह ॥ ४ ॥ अग्नेरक्षाणोअंहसःप्रतिष्मदेवरीषतः । तपिष्ठैरजरोदह ॥ ५ ॥ अग्नेभवसुषमिधासमिद्ध उतबर्हिरुर्वियाविस्तृणीतां । उतद्वारउशतीर्विश्रयंतामुतदेवाँउशतआवहेह ॥६॥ अद्यामुरीययदियातुधानोअस्मियदिवायुस्ततपपूरुषस्य । अधासवीरैर्दशभिर्वियूयायोमामोघंयातुधानेत्याह ॥७॥ अध्वर्योद्रावयात्वंसोममिंद्रःपिपासति । उपनूनंयुयुजेवृषणाहरीआचजगामवृत्रहा ॥ ८ ॥ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे । देवाँआसादयादिह ॥ ९ ॥ अग्नेबाधस्वविमृधोविदुर्गहापामीवामपरक्षांसिसेध । अस्मात्समुद्राद्बृहतोदिवोनोपांभूमानमुपनःसृजेह ॥१०॥ ततःशांत्यर्थंआनोभद्राःशंनइंद्राग्नीइत्यादिशांतिसूक्तानिसुवृष्ट्यर्थपर्जन्यसूक्तानिचजपेत् ॥ ॐ विश्वेत्तातेसवनेषुप्रवाच्यायाचकर्थमघवन्निंद्रसुन्वते । पारावतंयत्पुरुसंभृतंवस्वपावृणोःशरभायऋषिंबंधवे ॥ इतिमंत्रेणऋषीन्जलेउद्वासयेत् ॥ वेदप्रीत्यर्थंब्राह्मणान्भोजयेत् ॥ गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर । यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन ॥ इत्यग्निंविसृज्यद्विराचामेत् ॥ इत्युत्सर्जनप्रयोगः ॥ ॥ ॥

॥ अथोपाकर्मप्रयोगः ॥

श्रीः ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्य । ममाध्याप्यानांचाधीतानामध्येष्यमाणानांचछंदसांयातयामतानिरासेनाप्या

१ शांतिसूक्तानिपर्जन्यसूक्तानिचात्रैवपठनीयान्यपितानिसर्वाण्युपाकर्मप्रयोगांतेन्यस्तानिसंतितत्रावलोचनीयानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

१ शांतिसूक्तानिपर्जन्यसूक्तानिचात्रैवपठनीयान्यपितानिसर्वाण्युपाकर्मप्रयोगांतर्गतान्यस्तानिसांततत्रैवलिखितानि ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

यनद्वाराश्रीपरमेश्वरप्रीत्यर्थंएभिर्ब्राह्मणैःसहउपाकर्माख्यंकर्मकरिष्ये ।तदंगंगणपतिपूजनंस्थंडिलादिसर्वंकर्मकरिष्ये ।गणपतिं पूजयित्वास्मृत्वावा।स्थंडिलोपलेपनाद्यग्निध्यानांतंकृत्वाक्रियमाणेउपाकर्महोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये।अस्मिन्नन्वा हितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा अत्रप्रधानं सावित्रीं ब्रह्माणं श्रद्धां मेधां प्रज्ञां धारणां सदसस्पतिं अनुमतिं छंदांस्यृषी न् एताःप्रधानदेवताः आज्येन॥पुनरत्रप्रधानं अग्निं अमृणसूर्यान् अग्निं शकुंतं अग्निं मित्रावरुणौ अग्निं अपः अग्निं मरुतः अग्निं विश्वान्देवान् अग्निं इंद्रासोमौ इंद्रं अग्नामरुतः पवमानसोमं पवमानसोमं अग्निं संज्ञानं एताः प्रधानदेवताः दधिसक्तुद्रव्येण शेषेणस्विष्टकृतमग्निमिध्मसन्नहनेनरुद्रं यज्ञोपवीतेनपरमात्मानं अयासमग्निंदेवान्विष्णुं०सद्योयक्ष्ये । पात्रासादने दधिसक्तु स्थालीप्रोक्षण्यौइत्यादि दधिसक्तुनासहाज्यंत्रिःपर्यग्निकृत्वाचक्षुष्यंतेन्वाधानोक्तसावित्र्यादिनवनाममंत्रैराज्यंहुत्वा अत्रपंचा वत्तिनस्तिष्ठंतः ॐ प्रसूतोभक्षमकरंचरावपिस्तोमंचेमंप्रथमःसूरिरुन्मृजे ॥ सुतेसातेनयद्यागमंवांप्रतिविश्वामित्रजमदग्नीदमे ॥ इतिमंत्रंपठेयुः ॥ पंचावत्तीतुदर्व्यामुपस्तीर्यमध्यात्पूर्वार्धात्पश्चार्धाच्चत्रिर्हविषोवदायाभिघार्यजुहुयात् ॥ अग्निमीळेवैश्वामित्रो मधुच्छंदाअग्निर्गायत्री ॥ उपाकर्मप्रधानदधिसक्तुहोमेविनियोगः ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं स्वाहा ॥ अग्नयइदं० ॥ कुषुंभकस्तदगस्त्योमृणसूर्याअनुष्टुप्॥ उपाकर्मप्र० ॥ ॐ कुषुंभकस्तदब्रवीद्गिरेःप्रवर्तमानकः ॥ वृश्चिकस्यारसंविषमरसंवृश्चिकतेविषंस्वाहा ॥ अमृणसूर्येभ्यइ० ॥ त्वमग्नेद्युभिरित्यस्यशौनकोगृत्समदोऽग्निर्जगती ॥ उपाकर्म०॥

१ हुत्वाज्यंनवभिर्मंत्रैःसावित्र्याद्यैरतःपरं । अथावदानधर्मेणतान्सक्तून्दधिसंयुतान् । हुत्वाग्निमीळइत्याद्यैर्मंत्रैर्विंशतिभिःक्रमात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि॥त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिःस्वाहा।अग्नयइ०।
आवदन्छौनकोगृत्समदःशकुंतोजगती ॥ उपाकर्म० ॥ ॐ आवदस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धिनः ॥ यदु
त्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराःस्वाहा ॥ शकुंतायेदं० ॥ सोमस्यमागाथिनोविश्वामित्रोग्निस्त्रिष्टुप् ॥ उपाकर्मप्र
धा० ॥ ॐ सोमस्यमातवसंवक्ष्यग्नेवह्निंचकर्थविदथेयजध्यै ॥ देवाँअच्छादीद्यद्युजेअद्रिंशमायेअग्नेतन्वंजुषस्वस्वाहा ॥ अग्न
यइदं० ॥गृणानाभार्गवोजमदग्निर्मित्रावरुणौगायत्री ॥ उपाकर्म०॥ ॐ गृणानाजमदग्निनायोनावृतस्यसीदतं ॥ पातंसोममृता
वृधास्वाहा ॥ मित्रावरुणाभ्यामिदं० ॥ त्वांह्यग्नेगौतमोवामदेवोऽग्निरष्टी । उपाकर्म० ॥ ॐ त्वांह्यग्नेसदमित्समन्यवोदेवासो
देवमरतिंन्येरिरइतिक्रत्वान्येरिरे ॥अमर्त्यंयजतमर्त्येष्वादेवमादेवंजनतप्रचेतसंविश्वमादेवंजनतप्रचेतसंस्वाहा॥ अग्नयइदं०॥
धामंतेगौतमोवामदेवआपोजगती ॥ उपाकर्म०॥ॐ धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यं१तरायुषि ॥ अपामनीकेसमिथे
यआभृतस्तमश्यामधुमंतंतऊर्मिंस्वाहा ॥ अद्भ्यइदं०॥अवोध्यात्रेयोबुधगविष्ठिरावग्निस्त्रिष्टुप् ॥ उपाकर्म० ॥ ॐ अवोध्यग्निः
समिधाजनानांप्रतिधेनुमिवायतीमुषासं ॥ यहाइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छस्वाहा ॥ अग्नयइदं० ॥ गंतान
आत्रेयएवयामरुन्मरुतोतिजगती ॥ उपाकर्म०॥ॐ गंतानोयज्ञंयज्ञियाःसुशमिश्रोताहवमरक्षएवयामरुत् ॥ ज्येष्ठासोनपर्वता
सोव्योमनियूयंतस्यप्रचेतसःस्यातदुर्धर्तवोनिदःस्वाहा॥ मरुद्भ्यइदं० ॥ त्वंह्यग्नेवार्हस्पत्योभारद्वाजोऽग्निस्त्रिष्टुप् ॥ उपाकर्म० ॥
ॐ त्वंह्यग्नेप्रथमोमनोतास्याधियोअभवोदस्महोता ॥ त्वंसीवृषंनकृणोर्दुष्टरीतुसहोविश्वस्मैसहसेसहध्यैस्वाहा ॥ अग्नयइदं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योनस्वःपायुर्भारद्वाजोविश्वेदेवाअनुष्टुप् ॥ उपाकर्म० ॥ ॐ योनः स्वोअरणोयश्चनिष्ट्योजिघांसति ॥ देवास्तंसर्वेधूर्वतुब्रह्मवर्म ममांतरंस्वाहा ॥ विश्वेभ्योदेवेभ्यइ० ॥ अग्निंनरोमैत्रावरुणिर्वसिष्ठोऽग्निर्विराट् ॥ उपाकर्म० ॥ ॐ अग्निंनरोदीधितिभिररण्यो र्हस्तच्युतीजनयंतप्रशस्तं ॥ दूरेदृशंगृहपतिमथर्युंस्वाहा ॥ अग्नयइ० ॥ प्रतिचक्ष्वमैत्रावरुणिर्वसिष्ठेंद्रासोमावनुष्टुप् ॥ उपाक० ॥ ॐ प्रतिचक्ष्वविचक्ष्वेंद्रश्चसोमजागृतं ॥ रक्षोभ्योवधमस्यतमशनिंयातुमन्ध्यःस्वाहा ॥ इंद्रासोमाभ्यामिदं० ॥ माचित्काण्वः प्रगाथइंद्रोबृहती ॥ उपाकर्म० ॥ ॐ माचिदन्यद्विशंसतसखायोमारिषण्यत ॥ इंद्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशंसत स्वाहा ॥ इंद्राये० ॥ आग्नेयाहिसौभरिरग्नामरुतोऽनुष्टुप् ॥ उपाक० ॥ ॐ आग्नेयाहिमरुत्सखारुद्रेभिःसोमपीतये ॥ सोभर्या ऽउपसुष्टुतिंमादयस्वस्वर्णरेस्वाहा ॥ अग्नामरुद्भ्यइदं० ॥ स्वादिष्ठयामधुच्छंदाःपवमानःसोमोगायत्री ॥ उपाकर्म० ॥ ॐ स्वादिष्ठ यामदिष्ठयापवस्वसोमधारया ॥ इंद्रायपातवेसुतःस्वाहा ॥ पवमानायसोमायेदं० ॥ यत्तेराजन्मारीचःकश्यपःपवमानःसोमः पंक्तिः ॥ उपाकर्म० ॥ ॐ यत्तेराजन्छृतंहविस्तेनसोमाभिरक्षनः ॥ अरातीवामानस्तारीन्मोचनःकिंचनाममदिंद्रायेंदोपरिस्रव स्वाहा । पवमानायसोमायेदं० ॥ अग्नेबृहन्नाप्त्यस्त्रितोऽग्निस्त्रिष्टुप् । उपाकर्म० ॥ ॐ अग्नेबृहन्नुषसामूर्ध्वोअस्थान्निर्जगन्वा न्तमसोज्योतिषागात् ॥ अग्निर्भानुनारुशतास्वंगआजातोविश्वासद्मान्यप्राःस्वाहा ॥ अग्नयइदं० ॥ समानीवइत्यस्यांगिरसः संवननःसंज्ञानमनुष्टुप् ॥ उपाक० ॥ ॐ समानीवआकूतिःसमानाहृदयानिवः ॥ समानमस्तुवोमनोयथावःसुसहासति स्वाहा ॥ संज्ञा नायेदं० ॥ ततःस्विष्टकृतंहुत्वारज्जुंप्रहृत्यदधिसक्तून्प्राश्नीयुः ॥ दधिक्राव्णोवामदेवोदधिक्रावानुष्टुप् दधिसक्तुप्राशनेविनियोगः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः । सुरभिनोमुखाकरत्प्रणआयूंषितारिषत्स्वाहा ॥ प्राश्यआचम्यमार्जयेयुः ॥ उत्तरपरिस्तरणैरंजलिमन्तर्धायाऽन्येनापआसेचयतेतन्मार्जनम् । प्राशनादिवेदारंभणान्तंसर्वैःकार्यं ॥ यज्ञोपवीतमितिमंत्रस्य परब्रह्मपरमात्मात्रिष्टुप्यज्ञोपवीतहवनेविनियोगः ॥ ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् । आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजःस्वाहा । परमात्मनइदंनमम ॥ ततःसदक्षिणानियज्ञोपवीतानियथाशक्तिब्राह्मणेभ्योदत्त्वास्वयंधारयेत् ॥ अन्येसर्वेपिस्वस्वधार्ययज्ञोपवीतानिपृथगभिमंत्र्यधारयेयुः ॥ ॥ ॥ ॥

॥ यज्ञोपवीताभिमंत्रणम् ॥

उपाकर्मांगत्वेनयज्ञोपवीताभिमंत्रणंधारणंचक० ॥ ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप् । सूत्रकरणेवि० । ॐ ब्रह्मजज्ञानं प्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः॥सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री सूत्रत्रिगुणीकरणेवि० । ॐ इदंविष्णु० ॥ त्र्यंबकंमैत्रावरुणिर्वसिष्ठोरुद्रोनुष्टुप् । ग्रंथिबंधनेविनियो० ॥ ॐ त्र्यंबकंयजामहे० ॥ आपोहिष्ठेतितृचस्यांबरीषःसिंधुद्वीपआपोगायत्री यज्ञोपवीताभिमंत्रणेवि० । ॐ आपोहिष्ठा० ३ ऋचः । हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः । अग्निंयागर्भंदधिरेविरूपास्तानआपःशꣳस्योनाभवंतु ॥ यासाꣳराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां । मधुश्चुतःशुचयोयाःपावकास्तानआपःशꣳस्योनाभवंतु ॥ यासांदेवादिविकृण्वंतिभक्षंया

१ वेदारंभणतःपूर्वंसक्तुप्राशनतःपरं ॥ नवयज्ञोपवीतानिहुत्वादत्त्वाचधारयेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंतरिक्षेबहुधाभवंति । याःपृथिवींपयसोंदंतिशुक्रास्तानआपःशꣳस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशतत्वचंमे । सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ ॐ पवमानःसुवर्जनः । पवित्रेणविचर्षणिः । यःपोतासपुनातुमा । पुनंतुमादेवजनाः । पुनंतुमनवोधिया । पुनंतुविश्वआयवः । जातवेदःपवित्रवत् । पवित्रेणपुनाहिमा । शुक्रेणदेवदीद्यत् । अग्नेक्रत्वाक्रतूꣳरनु । यत्तेपवित्रमर्चिषि । अग्नेवितततमंतरा । ब्रह्मतेनपुनीमहे । उभाभ्यांदेवसवितः । पवित्रेणसवेनच । इदंब्रह्मपुनीमहे । वैश्वदेवीपुनतीदेव्यागात् । यस्यैबह्वीस्तनुवोवीतपृष्ठाः । तयामदंतःसधमाद्येषु । वयꣳस्यामपतयोरयीणां । वैश्वानरोरश्मिभिर्मापुनातु । वातःप्राणेनेषिरोमयोभूः । द्यावापृथिवीपयसापयोभिः । ऋतावरीयज्ञियेमापुनीतां । बृहद्भिःसवितस्त्रिभिः । वर्षिष्ठैर्देवमन्मभिः । अग्नेदक्षैःपुनाहिमा । येनदेवाअपुनत । येनापोदिव्यंकशः । तेनदिव्येनब्रह्मणा । इदंब्रह्मपुनीमहे । यःपावमानीरध्येति । ऋषिभिःसंभृतꣳरसं । सर्वꣳसपूतमश्नाति । स्वदितंमातरिश्वना । पावमानीर्योऽअध्येति । ऋषिभिःसंभृतꣳरसं । तस्मैसरस्वतीदुहे । क्षीरꣳसर्पिर्मधुदकं । पावमानीःस्वस्त्ययनीः । सुदुघाहिपयस्वतीः । ऋषिभिःसंभृतोरसः । ब्राह्मणेष्वमृतꣳहितं । पावमानीर्दिशंतुनः । इमंलोकमथोअमुं । कामान्त्समर्धयंतुनः । देवीर्देवैःसमाभृताः । पावमानीःस्वस्त्ययनीः । सुदुघाहिघृतश्चुतः । ऋषिभिःसंभृतोरसः । ब्राह्मणेष्वमृतꣳहितं । येनदेवाःपवित्रेण । आत्मानंपुनतेसदा । तेनसहस्रधारेण । पावमान्यःपुनंतुमा । प्राजापत्यंपवित्रं । शतोद्यामꣳहिरण्मयं । तेनब्रह्मविदोवयं । पूतंब्रह्मपुनीमहे । इंद्रःसुनीतीसहमापुनातु । सोमःस्वस्त्यावरुणःसमीच्या । यमोराजाप्रमृणाभिःपुनातुमा । जातवेदामोर्जयंत्यापुनातु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ भूरग्निंचपृथिवींचमांच । त्रीꣳश्चलोकान्त्सँवत्सरंच । प्रजापतिस्त्वासादयतु । तयादेवतयांगिरस्वद्ध्रुवासीद । ॐ भुवोवायुं
चांतरिक्षंचमांच । त्रीꣳश्चलोकान्त्सँवत्सरंच । प्रजापतिस्त्वासादयतु । तयादेवतयांगिरस्वद्ध्रुवासीद । ॐ स्वरादित्यंचदिवं
चमांच । त्रीꣳश्चलोकान्त्सँवत्सरंच । प्रजापतिस्त्वासादयतु । तयादेवतयागिरस्वद्ध्रुवासीद ॥ ॐ भूर्भुवःसुवश्चंद्रमसंचदिश
श्चमांच । त्रीꣳश्चलोकान्त्सँवत्सरंच । प्रजापतिस्त्वासादयतु । तयादेवतयांगिरस्वद्ध्रुवासीद । ॐ कारंप्रथमतंतौन्यसामि ।
अग्निंद्वितीयतंतौन्यसामि । नागांस्तृतीयतंतौन्यसामि । सोमंचतुर्थतंतौन्यसामि । पितॄन्पंचमतंतौन्यसामि । प्रजापतिंषष्ठतं
तौन्यसामि । वायुंसप्तमतंतौन्यसामि । सूर्यमष्टमतंतौन्यसामि । विश्वान्देवान्नवमतंतौन्यसामि । ऋग्वेदंप्रथमदोरकेन्य
सामि । यजुर्वेदंद्वितीयदोरकेन्यसामि । सामवेदंतृतीयदोरकेन्यसामि । अथर्ववेदंग्रंथौन्यसामि । प्रतियज्ञोपवीतंदशगायत्री
मंत्रंजप्त्वा । उद्यन्नद्येतितिसृभिःसूर्यायदर्शयित्वा । गायत्र्यात्रिस्ताडयेत् । यज्ञोपवीतमितिमंत्रस्यपरब्रह्मपरमात्मात्रिष्टुप् ।
श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंयज्ञोपवीतधारणेविनियोगः ॥ ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् । आयुष्यमग्र्यं
प्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः । इतिमंत्रेणप्रथमंदक्षिणबाहुमुद्धृत्यपश्चात्कंठेधारयेत् ॥ आचम्य ॥ समुद्रंगच्छस्वाहा ।
इतिजीर्णयज्ञोपवीतंजलेविसर्जयेत् । ततःसर्वैःसहप्राणानायम्यपृथ्वीतिमंत्रस्य इत्याद्युत्सर्जनांगवत्ब्रह्मयज्ञांते सर्वेउपाकृतावै
वेदाः इत्युक्त्वा अंजलिस्थान्कुशान्दक्षिणकटौनिवेशयेयुः ॥ ततआचार्यःप्रायश्चित्तादिहोमशेषंसमापयेत् । ततःसर्वेवेदप्रीत्यर्थं
ब्राह्मणभोजनंसंकल्प्यदक्षिणांदद्युः ॥ आचार्यःअग्निंविसृज्यकर्मेश्वरार्पणंकृत्वाविष्णुंनत्वाद्विराचामेत् ॥ इत्युपाकर्मप्रयोगः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अथनूतनब्रह्मचारिश्रावणी ॥

तत्रोपाकर्मणिविशेषः। देशकालौनिर्दिश्यास्यनूतनब्रह्मचारिणःवेदग्रहणाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंउपाकर्माख्यंकर्मकरिष्ये। आदौनिर्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये इतिसंकल्प्यनांदीश्राद्धांतंकृत्वाशेषंसर्वंपूर्ववत्कुर्यात्। यज्ञोपवीतधारणकाले । ब्रह्मचारीचेत्कटिसूत्रकौपीनवस्त्राजिनयज्ञोपवीतमेखलादंडानुपनयनवद्धारयित्वापुराणानिजलेनिक्षिपेत् ॥ तत्रमंत्राः । युवंवस्त्राणीत्यस्यौचथ्योदीर्घतमामित्रावरुणौत्रिष्टुप् ॥ वस्त्रधारणेविनि० ॥ ॐ युवंवस्त्राणिपीवसावसाथेयुवोरच्छिद्रामंतवोहसर्गाः॥ अवातिरतमनृतानिविश्वंऋतेनमित्रावरुणासचेथे ॥ मित्रस्यचक्षुरित्यस्यवामदेवोऽजिनंत्रिष्टुप् ॥ अजिनधारणेवि० ॥ ॐ मित्रस्यचक्षुर्धरुणंबलीयस्तेजोयशस्वीस्थविरंसमिद्धं ॥ अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंदधेहं ॥ यज्ञोपवीतमिति० यज्ञोपवीतधारणे० ॥ ॐ यज्ञोपवीतं० तेजः ॥ इयंदुरुक्तादितिद्वयोर्वामदेवोमेखलात्रिष्टुप् । मेखलाबंधनेविनियोगः ॥ ॐ इयंदुरुक्तात्परिबाधमानाशर्मवरूथंपुनतीनआगात् ॥ प्राणापानाभ्यांबलमाभरंतीप्रियादेवानांसुभगामेखलेयं ॥ ऋतस्यगोप्त्रीतपसःपरस्पीघ्नतीरक्षःसहमानाअरातीः ॥ सानःसमंतमनुपरेहिभद्रयाभर्तारस्तेमेखलेमारिषाम ॥ मेखलांत्रिरावृत्यनाभिप्रदेशेग्रंथित्रयंकुर्यात् ॥ स्वस्तिनइत्यस्यस्वस्त्यात्रेयोविश्वेदेवास्त्रिष्टुप् ॥ दंडदानेवि० ॥ ॐ स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः ॥ स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना ॥ अदांतंदमयित्वामांमार्गेसंस्थापयन्स्वयं ॥ दंडःकरेस्थितोयस्मात्तस्माद्रक्षयतोभयं ॥ इतिविशेषः ॥ ततः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाप्तौकर्मेश्वरार्पणंकृत्वायथाशक्तिब्राह्मणभोजनंसंकल्प्यब्राह्मणान्संपूज्यकर्मेश्वरार्पणं ॥ इतिनूतनब्रह्मचारिणउपाकर्म ॥ ॥

॥ अथसभादीपदानम् ॥

श्रीः ॥ आचम्य देशकालौसंकीर्त्य पुराणोक्तफलावाप्त्यर्थं ममइहजन्मनिजन्मांतरेचाखंडितसौभाग्याद्यवाप्तयेपुत्रपौत्रधनधान्यादिसमृद्धयेवांछितसर्वमनोरथप्राप्तयेचसभादीपदानकल्पोक्तफलावाप्तिकामाऽहंब्रह्मविष्णुरुद्रप्रीत्यर्थंब्राह्मणसभायांअग्निसंनिधौब्राह्मणायसभादीपदानंकरिष्ये । तत्रादौगणपतिपूजनंपंचशब्दैःपुण्याहवाचनंदीपपूजनंब्राह्मणपूजनंचकरिष्ये । दीपपूजांकृत्वाब्राह्मणंसंपूज्य ॥ भोदीपब्रह्मरूपस्त्वंज्योतिषांप्रभुरव्ययः ॥ आरोग्यंदेहिपुत्रांश्चअवैधव्यंप्रयच्छमे ॥ श्रावणेमास्युपाकर्मण्यारब्धेविप्रसंसदि ॥ व्रीहितंडुलपिष्टस्यपाचितेनचनिर्मितं ॥ घृतवर्त्यग्निसंयुक्तंविमलेकांस्यभाजने ॥ सपादतंडुलप्रस्थंपूरितंसुप्रतिष्ठितं ॥ अवैधव्यंसुपुत्रत्वंदीर्घायुःश्रीसुखाप्तये ॥ सभादीपप्रदानेनतुभ्यंविप्रसदक्षिणं ॥ ब्रह्मविष्णुमहेशाश्चप्रीयंतांदीपदानतः ॥ ममाभीष्टप्रदाःसंतुभवेस्मिन्वाभवांतरे ॥ सर्वकामप्रदातॄणांदीपदानप्रतोषिताः ॥ श्रावण्यांश्रवणर्क्षेचसभायामग्निसन्निधौ ॥ सभादीपप्रदानेनततःशांतिंप्रयच्छमे ॥ स्वस्त्यस्तु दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ इदंसभादीपदानंदक्षिणातांबूलसहितंअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे तेनश्रीब्रह्मविष्णुरुद्राःप्रीयंतां ॥ इतिसभादीपदानविधिः ॥ ॥

॥ अथशांतिसूक्तानि ॥

श्रीः ॥ आनोभद्राइतिदशर्चस्यसूक्तस्यगौतमोराहूगणोविश्वेदेवाजगती षष्ठीविराट्स्थाना अंत्यास्तिस्रस्त्रिष्टुभः । स्वस्तिनइति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पंचानांस्वस्त्यात्रेयोविश्वेदेवास्त्रिष्टुप् अन्त्येद्वेअनुष्टुभौ । शंनइंद्राग्नीतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् । यतइंद्रे तिषण्णांभर्गःप्रगाथइंद्रःप्रागाथंभद्रंनइत्यस्यऐंद्रोविमदोऽग्निरेकपदाविराट् । आशुःशिशानइतित्रयोदशर्चस्यसूक्तस्याप्रतिरथ ऐंद्रइंद्रोदेवता चतुर्थ्याबृहस्पतिः द्वादश्याआपोवात्रयोदश्याइंद्रोमरुतोवात्रिष्टुव्अंत्यानुष्टुप् । मुंचामित्वेतिपंचर्चस्यसूक्तस्यय क्ष्मनाशनःप्राजापत्यो राजयक्ष्मघ्नंत्रिष्टुप्अंत्यानुष्टुप् । त्यमूष्वितितृचस्यसूक्तस्यारिष्टनेमिस्तार्क्ष्यस्तार्क्ष्यस्त्रिष्टुप् । महित्रीणामि तितृचस्यसूक्तस्यसत्यधृतिर्वारुणिरदितिःस्वस्त्ययनंगायत्री । रात्रीव्यख्यदित्यष्टर्चस्यसूक्तस्यकुशिकःसौभरोरात्रिर्वाभारद्वाजी रात्रिस्तवोगायत्रं । सर्वारिष्टशांत्यर्थेशांतिसूक्तरात्रिसूक्तजपेविनियोगः ॥ ॐ आनोभद्राःक्रतवोयंतुविश्वतोदब्धासोअपरीता सउद्भिदः॥ देवानोयथासदमिद्वृधेअसन्नप्रायुवोरक्षितारोदिवेदिवे॥देवानांभद्रासुमतिर्ऋजूयतांदेवानांरातिरभिनोनिवर्ततां॥ देवानांसख्यमुपसेदिमावयंदेवानआयुःप्रतिरंतुजीवसे ॥ तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्त्रिधं ॥ अर्यमणंवरु णंसोममश्विनासरस्वतीनःसुभगामयस्करत् ॥तन्नोवातोमयोभुवातुभेषजंतन्मातापृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणःसोमसुतोम योभुवस्तदश्विनाशृणुतंधिष्ण्यायुवं ॥ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं ॥ पूषानोयथावेदसामसद्वृधेर क्षितापायुरदब्धःस्वस्तये ॥ १ ॥ स्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्प तिर्दधातु ॥ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथेषुजग्मयः ॥ अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाऽअवसागम न्निह ॥ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ शतमिन्नुशर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोअंतिदेवायत्रानश्चक्राजरसंतनूनां ॥ पुत्रासोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गतोः ॥ अदितिर्द्यौरदितिरंतरिक्षमदिति
र्मातासपितासपुत्रः ॥ विश्वेदेवाअदितिःपंचजनाअदितिर्जातमदितिर्जनित्वं ॥ २ ॥ स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदे
व्यदितिरनर्वणः ॥ स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना ॥ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्यय
स्पतिः ॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः ॥ विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये ॥ देवा
ऽअवंत्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः ॥ स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति ॥ स्वस्तिनइंद्रश्चाग्निश्चस्वस्तिनोअदिते
कृधि ॥ स्वस्तिपंथामनुचरेमसूर्याचंद्रमसाविव ॥ पुनर्ददताघ्नताजानतासंगमेमहि ॥ ३॥ स्वस्त्ययनंताक्ष्यमरिष्टनेमिंमहद्भूतं
वायसंदेवतानां ॥ असुरघ्नमिंद्रसखंसमत्सुबृहद्यशोनावमिवारुहेम ॥ अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचताक्ष्यं ॥ प्रय
तपाणिःशरणंप्रपद्येस्वस्तिसंबाधेष्वभयंनोऽअस्तु ॥ ४ ॥ शंनइंद्राग्नीभवतामवोभिःशंनइंद्रावरुणारातहव्या ॥ शमिंद्रासोमा
सुवितायशंयोःशंनइंद्रापूषणावाजसातौ ॥ शंनोभगःशमुनःशंसोअस्तुशंनःपुरंधिःशमुसंतुरायः ॥ शंनःसत्यस्यसुयमस्यशंसः
शंनोअर्यमापुरुजातोऽअस्तु ॥ शंनोधाताशमुधर्तानोअस्तुशंनउरूचीभवतुस्वधाभिः ॥ शंरोदसीबृहतीशंनोअद्रिःशंनोदेवानां
सुहवानिसंतु॥शंनोअग्निर्ज्योतिरनीकोअस्तुशंनोमित्रावरुणावश्विनाशं ॥ शंनःसुकृतांसुकृतानिसंतुशंनइषिरोअभिवातुवातः॥
शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयेनोअस्तु ॥ शंनओषधीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः ॥ ५ ॥ शंनइंद्रोवसु
भिर्देवोअस्तुशंमादित्येभिर्वरुणःसुशंसः ॥ शंनोरुद्रोरुद्रेभिर्जलाषःशंनस्त्वष्टाग्नाभिरिहशृणोतु ॥ शंनःसोमोभवतुब्रह्मशंनःशं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोग्रावाणः शमु संतु यज्ञाः ॥ शंनः स्वरूणामितयो भवंतु शंनः प्रस्व१ः शम्वस्तु वेदिः ॥ शंनः सूर्य उरुचक्षा उदेतु शंन श्चतस्रः प्रदिशो भवंतु ॥ शंनः पर्वता ध्रुवयो भवंतु शंनः सिंधवः शमु संत्वापः ॥ शंनो अदितिर्भवतु व्रतेभिः शंनो भवंतु मरुतः स्वर्काः ॥ शंनो विष्णुः शमु पूषा नो अस्तु शंनो भवित्रं शम्वस्तु वायुः ॥ शंनो देवः सविता त्रायमाणः शंनो भवंतु पूषसो विभातीः ॥ शंनः पर्जन्यो भवतु प्रजाभ्यः शंनः क्षेत्रस्य पतिरस्तु शंभुः ॥६॥ शंनो देवा विश्वदेवा भवंतु शंसरस्वती सहधीभिरस्तु ॥ शमभिषाचः शमु रातिषाचः शंनो दिव्याः पार्थिवाः शंनो अप्याः ॥ शंनः सत्यस्य पतयो भवंतु शंनो अर्वंतः शमु संतु गावः ॥ शंन ऋभवः सुकृतः सुहस्ताः शंनो भवंतु पितरो हवेषु ॥ शंनो अजएकपाद्देवो अस्तु शंनो हिर्बुध्न्य१ः शंसमुद्रः ॥ शंनो अपान्नपात्पेरुरस्तु शंनः पृश्निर्भवतु देवगोपा ॥ आदित्या रुद्रा वसवो जुषंतेदं ब्रह्म क्रियमाणं नवीयः ॥ शृण्वंतु नो दिव्याः पार्थिवासो गोजाता उत यज्ञियासः ॥ ये देवानां यज्ञियां यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ॥ तेनो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥७॥ (शंवतीः पारयंत्येतेदं पृच्छंति वचो युजा ॥ अभ्यारं तं यमाकेतुं य एवेदमिति ब्रवन् ॥ भासाकेतुं परिस्रुतं भारतीर्ब्रह्मवर्धनीः ॥ संजानानामहीमाताय एवेदमिति ब्रवत् ॥ इंद्रस्तं किंविभुं प्रभुं भानुनेयं सरस्वतीं ॥ येन सूर्यमरोचयद्येनेमे रोदसी उभे ॥ जुषस्वाग्ने अंगिरः काण्वमेध्यातिथिं ॥ मा त्वा सोमस्य बर्बृहत्सुतस्य मधुमत्तमः ॥ त्वमग्ने अंगिरः शोचस्व देववीतमः ॥ आशंतमशंतमाभिरभिष्टिभिः शांतिः स्वस्तिमकुर्वत ॥ शंनः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु ॥ शंनो द्यावापृथिवी शं प्रजाभ्यः शंन एधिद्विपदे शं चतुष्पदे ॥८॥) यत इंद्र भयामहे ततो नो अभयं कृधि ॥ मघव

१ एतावत्पर्यंतमेवोत्सर्जनांते शांतिसूक्तानि पठित्वा पर्जन्यसूक्तानि पठेत् । अग्रेतनो भागः प्रसंगाच्छांतिपाठपूरणायात्र संगृहीतोऽस्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्छग्धितवतन्नऊतिभिर्विद्धिषोविमृधोजहि॥ त्वंहिराधस्पतेराधसोमहःक्षयस्यासिविधतः॥तंत्वावयंमघवन्निंद्रगिर्वणःसुतावंतोह
वामहे॥इंद्रस्पळुतवृत्रहापरस्पानोवरेण्यः॥ सनोरक्षिषच्चरमंसमध्यमंसपश्चात्पातुनःपुरः॥९॥ त्वंनःपश्चादधरादुत्तरात्पुरइंद्रनि
पाहिविश्वतः॥ आरेऽअस्मत्कृणुहिदैव्यंभयमारेहेतीरदेवीः॥ अद्याद्याश्वश्वइंद्रत्रास्वपरेचनः॥विश्वाचनोजरितृन्त्सत्पतेअहा
दिवानक्तंचरक्षिषः॥ प्रभंगीशूरोमघवातुवीमघःसंमिश्लोवीर्यायकं॥ उभातेबाहूवृषणाशतक्रतोनियावज्रंमिमिक्षतुः॥ १०॥
भद्रंनोअपिवातयमनः॥ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां॥संक्रंदनोनिमिषएकवीरःशतंसेनाअजयत्सा
कमिंद्रः॥ संक्रंदनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥ तदिंद्रेणजयततत्सहध्वंयुधोनरइषुहस्तेनवृष्णा॥ सइषु
हस्तैःसनिषंगिभिर्वशीसंस्रष्टासयुधइंद्रोगणेन॥ संसृष्टजित्सोमपावाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता॥बृहस्पतेपरिदीयारथेन
रक्षोहामित्राँऽअपबाधमानः॥प्रभंजन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यविताराथानां॥ बलविज्ञायस्थविरःप्रवीरःसहस्वान्वाजी
सहमानउग्रः॥अभिवीरोअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित्॥ गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥
इमंसजाताअनुवीरयध्वमिंद्रंसखायोअनुसंरभध्वं॥११॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशतमन्युरिन्द्रः॥ दुश्च्यवनः
पृतनाषाळयुध्योऽस्माकंसेनाअवतुप्रयुत्सु॥ इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः॥ देवसेनानामभिभंजतीनांजयं
तीनांमरुतोयंत्वग्रं॥ इंद्रस्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुतांशर्धउग्रं॥ महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात्॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमनांसि॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयंतुघोषाः॥ अस्माक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिंद्रः समृतेषुध्वजेष्वस्माकंयाइषवस्ताजयंतु ॥ अस्माकंवीराउत्तरेभवंत्वस्माँऽउदेवाअवताहवेषु ॥ अमीषांचित्तंप्रतिलोभयंती गृहाणांगान्यप्वेपरेहि ॥ अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासचंतां ॥ प्रेताजयतानरइंद्रोवःशर्मयच्छतु ॥ उग्रावःसंतु बाहवोनाधृष्यायथासथ ॥ १२ ॥ असौयासेनामरुतःपरेषामभ्यैतिनओजसास्पर्धमाना ॥ तांगूहततमसापव्रतेनयथामीषाऽअन्योऽअन्यंनजानात् ॥ अंधाअमित्राभवताशीर्षाणाऽअहयइव ॥ तेषांवोऽअग्निर्दग्धानामग्निर्मूढानामिंद्रोहंतुवरंवनं ॥१३॥ मुंचामित्वाहविषाजीवनायकमज्ञातयक्ष्मादुतराजयक्ष्मात् ॥ ग्राहिर्जग्राहयदिवैतदेनंतस्याइंद्राग्नीप्रमुंमुक्तमेनं ॥ यदिक्षितायुर्यदिवापरेतोयदिमृत्योरंतिकंनीतएव ॥ तमाहरामिनिर्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय ॥ सहस्राक्षेणशतशारदेनशतायुषाहविषाहार्षमेनं ॥ शतंयथेमंशरदोनयातींद्रोविश्वस्यदुरितस्यपारं ॥ शतंजीवशरदोवर्धमानःशतंहेमंतान्छतमुवसंतान् ॥ शतमिंद्राग्नीसविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ॥ आहार्षंत्वाविदंत्वापुनरागाःपुनर्नव ॥ सर्वांगसर्वंतेचक्षुःसर्वमायुश्चतेविदं ॥१४॥ त्यमूषुवाजिनंदेवजूतंसहावानंतरुतारंरथानां ॥ अरिष्टनेमिंपृतनाजमाशुंस्वस्तयेतार्क्ष्यमिहाहुवेम ॥ इंद्रस्येवरातिमाजोहुवानास्वस्तयेनावमिवारुहेम ॥ उर्वीनपृथ्वीबहुलेगभीरेमावामेतौमापरेतौरिषाम ॥ सद्यश्चिद्यःशवसापंचकृष्टीःसूर्यइवज्योतिषापस्ततान ॥ सहस्रसाःशतसाऽअस्यरंहिर्नस्मावरंतेयुवतिंनशर्यां ॥ १५ ॥ महित्रीणामवोस्तुद्युक्षंमित्रस्यार्यम्णः ॥ दुराधर्षंवरुणस्य ॥ नहितेषाममाचननाध्वसुवारणेषु ॥ ईशेरिपुरघशंसः ॥ यस्मैपुत्रासोअदितेःप्रजीवसेमर्त्याय ॥ ज्योतिर्यच्छंत्यजस्रं ॥ १६ ॥ रात्रीव्यख्यदायतीपुरुत्रादेव्य१क्षभिः ॥ विश्वाअधिश्रियोधित ॥ ओर्वप्राअमर्त्यानिवतोदेव्यू१द्वतः ॥ ज्योतिषावा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धतेतमः ॥ निरुस्वसारमस्कृतोषसंदेव्यायती ॥ अपेदुहासतेतमः ॥ सानोअद्ययस्यावयंनितेयामंनविक्ष्महि॥वृक्षेनवसतिंवयः ॥
निग्रामासोअविक्षतनिपद्वंतोनिपक्षिणः ॥ निश्येनासश्चिदर्थिनः ॥ यावयावृक्यं वृकंयवयस्तेनमूर्म्ये ॥ अथानःसुतरांभव ॥
उपमापेपिशत्तमःकृष्णंव्यक्तमस्थित ॥ उषऋणेवयातय ॥ उपतेगाइवाकरंवृणीष्वदुहितर्दिवः ॥ रात्रिस्तोमंनजिग्युषे ॥ १७ ॥
आरात्रिपार्थिवंरजःपितरःप्रायुधामभिः॥ दिवःसदांसिबृहतीवितिष्ठसआत्वेषंवर्ततेतमः॥येतेरात्रीनृचक्षसोयुक्तासोनवतिर्नव ॥
अशीतिःसंत्वष्टाउतोतेसप्तसप्ततीः ॥ रात्रींप्रपद्येजननींसर्वभूतनिवेशनीं॥भद्रांभगवतींकृष्णांविश्वस्यजगतोनिशां ॥ संवेशनीं
संयमनींग्रहनक्षत्रमालिनीं ॥ प्रपन्नोहंशिवांरात्रींभद्रेपारमशीमहिभद्रेपारमशीमह्योनमः ॥ स्तोष्यामिप्रयतोदेवींशरण्यांबह्वृचप्रियां ॥
सहस्रसंमितांदुर्गांजातवेदसेसुनवामसोमं ॥ शांत्यर्थंतद्विजातीनामृषिभिःसोमपाश्रिताः ॥ ऋग्वेदेत्वंसमुत्पन्नारातीयतोनिदहातिवेदः ॥ येत्वांदेविप्रपद्यंतिब्राह्मणाहव्यवाहनीं ॥ अविद्यावहुविद्यावासनःपर्षदतिदुर्गाणिविश्वा ॥ येअग्निवर्णांशुभांसौम्यांकीर्तयिष्यंतियेद्विजाः ॥ तांतारयतिदुर्गाणिनावेवसिंधुंदुरितात्यग्निः ॥ दुर्गेषुविषमेघोरेसंग्रामेरिपुसंकटे ॥ अग्निचोरनिपातेषुदुष्टग्रहनिवारणेदुष्टग्रहनिवारण्योनमः ॥ दुर्गेषुविषमेषुत्वंसंग्रामेषुवनेषुच ॥ मोहयित्वाप्रपद्यंतेतेषांमेअभयंकुरुतेषांमेअभयंकुर्वोनमः॥ केशिनींसर्वभूतानांपंचमींतिचनामच ॥ सामांसमांदिशांदेवींसर्वतःपरिरक्षतुसर्वतःपरिरक्षत्वोंनमः ॥
तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां ॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमःसुतरसितरसेनमः ॥ दुर्गादुर्गेषु
स्थानेषुशंनोदेवीरभिष्टये ॥यइमंदुर्गास्तवंपुण्यंरात्रौरात्रौसदापठेत् ॥ रात्रिःकुशिकःसोभरोरात्रिर्वाभारद्वाजीरात्रिस्तवंगायत्रं॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रात्रीसूक्तंजपेन्नित्यंतत्कालउपपद्यते ॥१८॥ उलूकयातुंशुशुलूकयातुंजहिश्वयातुमुतकोकयातुं ॥ सुपर्णयातुमुतगृध्रयातुंदृषदे
वप्रमृणरक्षइंद्र ॥ पिशंगभृष्टिमंभृणंपिशाचिमिंद्रसंमृण ॥ सर्वरक्षोनिबर्हय ॥ रक्षाणोअग्नेतवरक्षणेभीरारक्षाणःसुमखप्रीणानः ॥
प्रतिष्फुरविरुजवीड्वंहोजहिरक्षोमहिचिद्वावृधानं ॥ ब्रह्मचतेजातवेदोनमश्चेयंचगीःसदमिद्वर्धनीभूत् ॥ रक्षाणोअग्नेतनयानि
तोकारक्षोतनस्तन्वो३ अप्रयुच्छन् ॥ १९ ॥ गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मण
स्पतआनःशृण्वन्नूतिभिःसीदसादनं ॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिं
धुंदुरितात्यग्निः ॥ क्षेत्रस्यपतिनावयंहितेनेवजयामसि ॥ गामश्वंपोषयित्न्वासनोमृळातीदृशे ॥ वास्तोष्पतेप्रतिजानीह्यस्मा
न्त्स्वावेशोअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे ॥ वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभि
रश्वेभिरिंदो ॥ अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व ॥ वास्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या ॥
पाहिक्षेमउतयोगेवरंनोयूयंपातस्वस्तिभिःसदानः ॥ अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् ॥ सखासुशेवएधिनः ॥ २० ॥
स्वप्नःस्वप्नाधिकरणेसर्वनिष्वापयाजिनं ॥ आसूर्यमन्यान्त्स्वापयब्यू१ह्लंजाग्रियादहं ॥ अजगरोनामसर्पःसर्पिरविषोमहान् ॥
तस्मिन्हिसर्पःसुधितस्तेनत्वास्वापयामसि ॥ सर्पःसर्पोअजगरःसर्पिरविषोमहान् ॥ तस्यसर्पोत्सिंधवस्तस्यगाधमशीमहि ॥
काळिकोनामसर्पोनवनागसहस्रबळः । यमुनह्रदेसोजातो३ योनारायणवाहनः ॥ यदिकाळिकदूतस्ययदिकाःकाळिकाद्भयात् ॥
जन्मभूमिमतिक्रांतोनिर्विषोयातिकाळिकः ॥ आयाहींद्रपथिभिरीळितेभिर्यज्ञमिमंनोभागधेयंजुषस्व ॥ तृप्तांजहुर्मातुळस्येवयो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षाभागस्तेपैतृष्वसेयीवपामिव ॥ यशस्करंबलवंतंप्रभुत्वंतमेवराजाधिपतिर्बभूव ॥ संकीर्णनागाश्वपतिर्नराणासुमंगल्यंसततं दीर्घमायुः ॥ कर्कोटकोनामसर्पोयोदृष्टोविषउच्यते ॥ तस्यसर्पस्यसर्पत्वंतस्मैसर्पनमोस्तुते ॥२१॥ माबिभेर्नमरिष्यसिपरित्वा पामिसर्वतः ॥ घनेनहन्मिवृश्चिकमहंदंडेनागतं ॥ आदित्यरथवेगेनविष्णोर्बाहुबलेनच ॥ गरुडपक्षनिपातेनभूमिंगच्छमहा यशाः ॥ गरुडस्यजातमात्रेणत्रयोलोकाःप्रकंपिताः ॥ प्रकंपितामहीसर्वासशैलवनकानना ॥ गगनंनष्टचंद्रार्कज्योतिषंनप्रका शते ॥ देवताभयवित्रस्तामारुतोनप्लवायतिमारुतोनप्लवायत्योनमः ॥ भोसर्पभद्रभद्रंतेदूरंगच्छमहायशाः ॥ जनमेजयस्ययज्ञां तेआस्तीकवचनंस्मर ॥ आस्तीकवचनंश्रुत्वायःसर्पोननिवर्तते ॥ शतधाभिद्यतेमूर्ध्निशिंशवृक्षफलंयथा ॥ अगस्त्योमाधवश्चैवमु चुकुंदोमहामुनिः ॥ कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः॥नमदायैनमःप्रातर्नमदायैनमोनिशि ॥ नमोस्तुनर्मदेतुभ्यंत्राहिमां विषसर्पतः ॥ योजरत्कारुणाजातोजरत्कन्यांमहायशाः ॥ तस्यसर्पापभद्रंतेदूरंगच्छमहायशाः ॥२७॥ तच्छंयोरावृणीमहेगातुंय ज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेषजं ॥ शंनोअस्तुद्विपदेशंचतुष्पदे ॥ ॐ नमोब्रह्मणेनमो अस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि ॥ ३ ॥ शांतापृथिवीशिवमंतरिक्षं द्यौर्नोदेव्यभयंनोअस्तु ॥ शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःशांतिःशांतिःशांतिः ॥ इतिशांतिसूक्तानि ॥ षष्ठीपूजाशीर्मंत्राः ॥ तमर्वतंनसानसिमरुषंनदिवःशिशुं ॥ मर्मृज्यंतेदिवेदिवे ॥ बोधद्यन्माहरिभ्यांकुमारःसाहदेव्यः ॥ अच्छान

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृतउदरं ॥ उतत्यायजताहरीकुमारात्साहदेव्यात् ॥ प्रयतासद्यआददे ॥ एषवांदेवावश्विनाकुमारःसाहदेव्यः ॥ दीर्घायुरस्तु सोमकः ॥ तंयुवंदेवावश्विनाकुमारंसाहदेव्यं ॥ दीर्घायुषंकृणोतन ॥ इतिशांतिपाठःसंपूर्णः ॥ ॥ ॥

॥ अथपर्जन्यसूक्तानि ॥

श्रीः ॥ अच्छावदेतिदशर्चस्यसूक्तस्यभौमोत्रिःपर्जन्यःद्वितीयाद्यास्तिस्रोजगत्यःनवम्यनुष्टुप् शिष्टाःषट्त्रिष्टुभः सुवृष्ट्यर्थंजपे विनियोगः ॥ ॐ अच्छावदतवसंगीर्भिराभिःस्तुहिपर्जन्यंनमसाविवास ॥ कनिक्रदद्वृषभोजीरदानूरेतोदधात्योषधीषुगर्भं ॥ विवृक्षान्हन्त्युतहंतिरक्षसोविश्वंबिभायभुवनंमहावधात् ॥ उतानागाईषतेवृष्ण्यावतोयत्पर्जन्यःस्तनयन्हंतिदुष्कृतः ॥ रथीव कशयाश्वाँऽअभिक्षिपन्नाविर्दूतान्कृणुतेवर्ष्याँ१ अह ॥ दूरात्सिंहस्यस्तनथाउदीरतेयत्पर्जन्यःकृणुतेवर्ष्यं१ नभः ॥ प्रवातावांति पतयंतिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः ॥ इराविश्वस्मैभुवनायजायतेयत्पर्जन्यःपृथिवींरेतसावति ॥ यस्यव्रतेपृथिवीनंनमीतियस्यव्रतेशफवज्जर्भुरीति ॥ यस्यव्रतओषधीर्विश्वरूपाःसनःपर्जन्यमहिशर्मयच्छ ॥ १ ॥ दिवोनोवृष्टिंमरुतोररीध्वंप्रपिन्वत वृष्णोअश्वस्यधाराः॥ अर्वाङेतेनस्तनयित्नुनेह्यपोनिषिंचन्नसुरःपितानः॥ अभिक्रंदस्तनयगर्भमाधाउदन्वतापारिदीयारथेन॥ दृतिंसुकर्षविषितंन्यंचंसमाभवंतूद्वतोनिपादाः॥महांतंकोशमुदचानिषेचस्यंदंतांकुल्याविषिताःपुरस्तात् ॥ ऋतेनद्यावापृथिवी व्युंधिसुप्रपाणंभवत्वघ्न्याभ्यः। यत्पर्जन्यकनिक्रदत्स्तनयन्हंसिदुष्कृतः॥ प्रतीदंविश्वंमोदतेयत्किंचपृथिव्यामधि ॥ अवर्षीर्वर्षमुदुषूगृभायाकर्धन्वान्यत्येतवाऽउ ॥ अजीजनओषधीर्भोजनायकमुतप्रजाभ्योविदोमनीषां ॥ २ ॥ तिस्रोवाचइतिषळर्चस्यसूक्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्याग्नेयःकुमारोमैत्रावरुणिःपर्जन्यस्त्रिष्टुप्॥ सुवृष्ट्यर्थंजपेविनियोगः॥ॐ तिस्रोवाचःप्रवदज्योतिरग्रायाएतद्धृहेमधुदोघमूर्धः॥ सवत्संकृण्वन्गर्भमोषधीनांसद्योजातोवृषभोरोरवीति ॥ योवर्धनओषधीनांयोअपांयोविश्वस्यजगतोदेवईशे॥सत्रिधातुशरणंश र्मयंसत्रिवर्तुज्योतिःस्वभिष्ट्यइस्मे ॥ स्तरीरुत्वद्भवतिसूतउत्वद्यथावशंतन्वंचक्रएषः॥ पितुःपयःप्रतिगृभ्णातिमातातेनपितावर्धते तेनपुत्रः॥यस्मिन्विश्वानिभुवनानितस्थुस्तिस्रोद्यावस्त्रेधासस्रुरापः ॥ त्रयःकोशासउपसेचनासोमध्वश्चोतंत्यभितोविरप्शं ॥ इदंवचःपर्जन्यायस्वराजहृदोअस्त्वंतरंतज्जुजोषत् ॥ मयोभुवोवृष्टयःसंत्वस्मेसुपिप्पलाओषधीर्देवगोपाः ॥ सरेतोधावृषभःशश्वतीनांतस्मिन्नात्माजगतस्तस्थुषश्च ॥ तन्मऋतंपातुशतशारदाययूयंपातस्वस्तिभिःसदानः ॥ १ ॥ ॥ पर्जन्यायेतितृचस्यसूक्तस्यआग्नेयःकुमारोमैत्रावरुणिर्वसिष्ठोवापर्जन्योगायत्रीसुवृष्ट्य० योगः ॥ ॐ पर्जन्यायप्रगायतदिवस्पुत्रायमीढुषे ॥ सनोयवंसमिच्छतु ॥ योगर्भमोषधीनांगवांकृणोत्यर्वतां ॥ पर्जन्यःपुरुषीणां ॥ तस्माइदास्येहविर्जुहोतामधुमत्तमं ॥ इळानःसंयतंकरत् ॥ २ ॥ संवत्सरमितिदशर्चस्यसूक्तस्यमैत्रावरुणिर्वसिष्ठोमंडूकाआद्यानुष्टुप् शिष्टास्त्रिष्टुभः सुवृष्ट्यर्थं० ॥ ॐ संवत्सरंशशयानाब्राह्मणाव्रतचारिणः॥ वाचंपर्जन्यजिन्वतांप्रमंडूकाअवादिषुः॥ दिव्याआपोअभियदेनमायन्दतिंनशुष्कंसरसीशयानं ॥ गवामहनमायुर्वत्सिनीनांमंडूकानांवग्नुरत्रासमेति ॥ यदीमेनाँऽउशतोअभ्यवर्षीत्तृष्यावतःप्रावृष्यागतायां ॥ अक्खलीकृत्यापितरंनपुत्रोऽअन्योअन्यमुपवदंतमेति ॥ अन्योअन्यमनुगृभ्णात्येनोरपांप्रसर्गेयदमंदिषातां ॥ मंडूकोयदभिवृष्टःकनिष्क्रन्पृश्निःसंपृक्तेहरितेनवाचं ॥ यदेषामन्योअन्यस्यवाचंशाक्तस्येववदतिशिक्षमाणः॥ सर्वंतदेषांसमृधेवपर्वयत्सुवाचोवदथनाध्यप्सु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ३ ॥ गोमायुरेकोअजमायुरेकःपृश्निरेकोहरितएकएषां ॥ समानंनामबिभ्रतोविरूपाःपुरुत्रावाचंपिपिशुर्वदंतः ॥ ब्राह्मणासो
अतिरात्रेनसोमेसरोनपूर्णमभितोवदंतः ॥ संवत्सरस्यतदहःपरिष्ठयन्मंडूकाःप्रावृषीणंबभूव ॥ ब्राह्मणासःसोमिनोवाचमक्रत
ब्रह्मकृण्वंतःपरिवत्सरीणं ॥ अध्वर्यवोघर्मिणःसिष्विदानाआविर्भवंतिगुह्यानकेचित् ॥ देवहितिंजुगुपुर्द्वादशस्यक्रतुंनरोनप्रमि
नंत्येते ॥ संवत्सरेप्रावृष्यागतायांतप्ताघर्माअश्नुवतेविसर्गं ॥ गोमायुरदादजमायुरदात्पृश्निरदाद्धरितोनोवसूनि ॥ गवांमंडूका
ददतःशतानिसहस्रसावेप्रतिरंतआयुः ॥ ४ ॥ उपप्लवंदमंडूकिवर्षमावदतादुरि ॥ मध्येह्रदस्यप्लवस्यनिगृह्यचतुरःपरः ॥ ॥
प्रदेवत्रेतिपंचदशर्चस्यसूक्तस्यऐलूषःकवष अपः अपांनप्तावात्रिष्टुप् सुवृष्ट्यर्थंजपेविनियोगः ॥ ॐ प्रदेवत्राब्रह्मणेगातुरेत्वपो
अच्छामनसोनप्रयुक्ति॥महींमित्रस्यवरुणस्यधासिंपृथुज्रयसेरीरधासुवृक्तिं॥ अध्वर्यवोहविष्मंतोहिभूताच्छापइतोशतीरुशंतः॥
अवयाश्चष्टेअरुणःसुपर्णस्तमास्यध्वमूर्मिमद्यासुहस्ताः ॥ अध्वर्यवोपइतासमुद्रमपांनपातंहविषायजध्वं ॥ सवोददद्धूर्मिमद्यासुपू
तंतस्मैसोममधुमंतंसुनोत ॥ योअनिध्मोदीदयद्प्स्वंतर्यविप्रासईळतेअध्वरेषु ॥ अपान्नपान्मधुमतीरपोदायाभिरिंद्रोवावृधे
वीर्याय ॥ याभिःसोमोमोदतेहर्षतेचकल्याणीभिर्युवतिभिर्नमर्यः ॥ ताअध्वर्योअपोअच्छापरेहियदासिंचाओषधीभिःपुनीतात्
॥ १॥ एवेद्यूनेयुवतयोनमंतयदीमुशंतुशतीरेत्यच्छ ॥ संजानतेमनसासंचिकित्रेध्वर्यवोधिषणापश्चदेवीः ॥ योवोवृताभ्योअकृ
णोदुलोकंयोवोमह्याअभिशस्तेरमुंचत् ॥ तस्माइंद्रायमधुमंतमूर्मिंदेवमादनंप्रहिणोतनापः ॥प्रास्मैहिनोतमधुमंतमूर्मिंगभोयोवः
सिंधवोमध्वउत्सः ॥ घृतपृष्ठमीड्यमध्वरेष्वापोरेवतीःशृणुताहवंमे ॥ तंसिंधवोमत्सरमिंद्रपानमूर्मिंप्रहेतवउभेइयर्ति ॥ मदच्यु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमौशानंनभोजांपारीत्रितंतुंविचरंतमुत्सं ॥ आवर्वृतंतीरधनुद्विधारागोषुयुधोननियवंचरंतीः ॥ ऋषेजनित्रीर्भुवनस्यपत्नीरपोवं
दस्वसवृधःसयोनीः ॥ २ ॥ हिनोतानोअध्वरंदेवयज्याहिनोतब्रह्मसनयेधनानां ॥ ऋतस्ययोगेविष्यध्वमूर्धःश्रुष्टीवरीर्भूतना
स्मभ्यमापः ॥ आपोरेवतीःक्षयथाहिवस्वःक्रतुंचभद्रंविभृथामृतंच ॥ रायश्चस्थस्वपत्यस्यपत्नीःसरस्वतीतद्वृणतेवयोधात् ॥
प्रतियदापोअदृश्रमायतीर्घृतंपयांसिबिभ्रतीर्मधूनि ॥ अध्वर्युभिर्मनसासंविदानाइंद्रायसोमंसुषुतंभरंतीः ॥ एमाअग्मन्नेवतीर्
जीवधन्याअध्वर्यवःसादयतासखायः ॥ निबर्हिषिधत्तनसोम्यासोपांनप्त्रासंविदानासएनाः ॥ आग्मन्नापउशतीर्बर्हिरेदंन्य
ध्वरेअसददेवयंतीः ॥ अध्वर्यवःसुनुतेंद्रायसोममभूदुवःसुशकादेवयज्या ॥३॥ ॥ ऋषयोवैसरस्वत्यांसत्रमासततेकवषमैलूषंसो
मादनयन्दास्याःपुत्रःकितवोब्राह्मणःकथंनोमध्येदीक्षिष्टेतितंबहिर्धन्वोदवहन्नत्रैनंपिपासाहंतुसरस्वत्याउदकंमापादितिसबहि
र्धन्वोदूहःपिपासयावित्तएतदपोनप्त्रीयमपश्यत्सदेवत्राब्रह्मणेगातुरेत्वितितेनापांप्रियंधामोपागच्छत्तमापोनूदायंस्तंसरस्वतीस
मंतंपर्यधावत्तस्माद्धाप्येतर्हिपरिसारकमित्याचक्षतेयदेनंसरस्वतीसमंतंपरिससारतेवाऋषयोब्रुवन्विदुर्वाइमंदेवाउपेमंह्वयामहा
इतितथेतितमुपाह्वयंततमुपहूयैतदपोनप्त्रीयमकुर्वतप्रदेवत्राब्रह्मणेगातुरेत्विति तेनापांप्रियंधामोपागच्छन्नुपदेवानामुपापांप्रि
यंधामगच्छत्युपदेवानांजयतिपरमंलोकंयएवंवेदयश्चैवंविद्वानेतदपोनप्त्रीयंकुरुते तत्संततमनुब्रूयात्संततवर्षीहप्रजाभ्यःपर्ज
न्योभवतियत्रैवंविद्वानेतत्संततमन्वाहयदवग्राहमनुब्रूयाज्जीमूतवर्षीहप्रजाभ्यःपर्जन्यः स्यात्तस्मात्तत्संततमेवानूच्यंतस्यत्रिःप्र
थमांसंततमन्वाहतेनैवतत्सर्वंसंततमनूक्तंभवति ॥ १ ॥ ताएतानवानंतरायमन्वाहहिनोतानोअध्वरंदेवयज्येतिदशमीमावर्वृत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीरधनुद्विधाराइत्यावृत्तास्वेकधनासुप्रतियदापोअदृश्रमायतीरिति प्रतिदृश्यमानास्वाधेनवःपयसातूर्ण्यर्थाइत्युपायतीषुसम
न्यायन्त्युपयन्त्यन्याइतिसमायतीष्वापोवाअस्पर्धंतवयंपूर्वंयज्ञंवक्ष्यामोवयमिति याश्चेमाःपूर्वेद्युर्वसतीवर्योगृह्यंतेयाश्चप्रातरे
कधनास्ताभृगुरपश्यदापोवैस्पर्धंतइतिताएतयर्चासमज्ञपयत्समन्यायंत्युपयंत्यन्याइति ताःसमजानतसंजानानाहास्यापोयज्ञं
वहंतियएवंवेदापोनदेवीरुपयंतिहोत्रियमिति होतृचमसेसमवनीयमानास्वन्वाहवसतीवरीष्वेकधनासुचावेरपोध्वर्या३उइति
होताध्वर्युंपृच्छत्यापोवैयज्ञोविदोयज्ञाँ३इत्येवतदाहोतेमनंनमुरित्यध्वर्युःप्रत्याहोतेमाःपश्येत्येवतदाह तास्वध्वर्योइंद्रायसोमं
सोतामधुमंतं ॥ वृष्टिवानिंतीत्रातंबहुरमध्यंवसुमतेरुद्रवतआदित्यवतऋभुमतेविभुमतेवाजवतेबृहस्पतिवतेविश्वदेव्यावते ।
यस्येंद्रःपीत्वावृत्राणिजंघनत्प्रसजन्यानितारिषो३मितिप्रत्युत्तिष्ठतिप्रत्युत्थेयावाआपःप्रतिवैश्रेयांसमायंतमुत्तिष्ठंतितस्मात्प्रत्यु
त्थेयाअनुपर्यावृत्याअनुवैश्रेयांसंपर्यावर्तंते तस्मादनुपर्यावृत्याअनुब्रुवैतवानुप्रपत्तव्यमीश्वरोहयद्यप्यनोयजेताथहोतारंयशोर्तो
स्तस्मादनुब्रुवतैवानुप्रपत्तव्यमंबयोयंत्यध्वभिरित्येतामनुब्रुवन्ननुप्रपद्येतजामयोअध्वरीयतां ॥ पृंचतीर्मधुनापयइतियोमधव्यो
यशोर्तोबुभूषेदमूर्याउपसूर्येयाभिर्वासूर्यःसहेति तेजस्कामोब्रह्मवर्चसकामोपोदेवीरुपह्वयेयत्रगावःपिवंतिनइतिपशुकामस्ता
एताः सर्वाएवानुब्रुवन्ननुप्रपद्येतैतेषांकामानामवरुध्याएतान्कामानावरुंधेयएवंवेदेमाअग्मन्नेवतीर्जीवधन्याइतिसाद्यमानास्व
न्वाहवसतीवरीष्वेकधनासुचाग्मन्नापउशतीर्वर्हिरेदमितिसन्नासुसएतयापरिदधाति ॥ २ ॥ इतिश्रावणीखंडे ॥ ॥ छ ॥

इदं पुस्तकं पणशीकरोपाह्वेन लक्ष्मणात्मजेन वासुदेवशर्मणा संशोधितं । तच्च तुकाराम जावजी इत्येतैः 'निर्णयसाराख्य' यंत्रे
मुद्रयित्वा प्रकाशितम् । शाकः१८३६, सन १९१४.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

RA224.SHA-A
14180

॥ इति उत्सर्जनोपाकरणप्रयोगः समाप्तः ॥

Publisher:— Tukaram Javaji, } the " Nirnaya-sagar " Press,
Printer:—R. Y. Shedge, } 23 Kolbhat Lane, Bombay.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय, गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Entered in Database
Signature with Date

1164

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar